विधि
ज्यो
99
२५
B

~~८२५~~ 1

२९०

५०

82

193

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

* अथ *

( सपरिशिष्टम् )

# व्यवहार-रत्नम्

मैथिलदैवज्ञवर-श्रीमद्भानुनाथशर्म्म
सङ्कलितम् ।

मै. पं. श्रीमुकुन्दशर्म्मणा हरिपुरग्राम-
वासिना परिशोधितं परिष्कृतंच

दरभंगा नगरस्थ-

कन्हैयालाल कृष्णदासेन स्वीये

"श्रीरमेश्वर" यन्त्रालये मैनेजर काशीनाथशर्म्म-
द्वारा मुद्रापयित्वा प्रकाशितम्

सम्बत् १९७४ मूल्यम् १० आना

अस्य पुनर्मुद्रणादिसर्वाधिकारः "श्रीरमेश्वर"
यन्त्रालयाधिपतिना स्वायत्तीकृतः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# अथ व्यवहार रत्न विषय सूची ।


| | पृ० | पं० |
|---|---|---|
| तत्रादौ मासभेदानाह— | १ | १२ |
| अथ कार्यभेदेनमसज्ञानमाह | ३ | ३ |
| अथ तिथीशानाह | ६ | ४ |
| अथ तिथीनां विशेषसञ्ज्ञामाह | ७ | ३ |
| अथ सिद्धियोगाः | ,, | ५ |
| अथ निन्द्ययोगाः | ,, | ८ |
| अथ दग्धातिथिः | ,, | १० |
| अथ भद्राविचारः | ,, | १४ |
| अथ भद्रावासमाह | ८ | ३ |
| अथ चन्द्रावस्थितराशिविशेषेण भद्रावस्थितिमाह | ,, | ७ |
| अथ नक्षत्रस्वामिविचारः | ,, | १३ |
| अथ नक्षत्राणां विशेषसंज्ञामाह | ९ | ३ |
| अथ ता  विचारः | ,, | १० |
| अथ दुष्टताराशान्तिमाह | ,, | १४ |
| अथ चन्द्रावस्थितिविचारः | १० | १ |
| अथ मेषादीनां संज्ञान्तरमाह | ,, | ४ |
| अथ चन्द्रानयनमाह | ,, | ९ |
| अथ चन्द्रवर्णज्ञानमाह | ,, | १३ |
| अथ चन्द्रतारावलकथनम् | ,, | १७ |
| अथ निषिद्धचन्द्रस्यशान्तिः | ११ | १ |
| अथ घातचन्द्रादयमाह | ,, | ४ |
| अथ घातचन्द्रादौविहितकर्माण्याह | ,, | ११ |
| अथ वारविचारः | ,, | १८ |
| अथ महरार्द्धविचारः | १२ | २ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat    www.umaragyanbhandar.com

| विषय | पृ० | पं० |
|---|---|---|
| अथ रात्यर्ध प्र० फलम् | १२ | १९ |
| अथ दिनर्क्षकुयोगमाह | ,, | ६ |
| अथ समयाशुद्धिः | ,, | ११ |
| अथ मन्वादि-युगादिविचारः | १३ | २ |
| अथोत्पातविचारः | ,, | १६ |
| **इति प्रथममुपदेशप्रकरणम् ।** | | |
| अथ वास्तुभूमिज्ञानमाह | १४ | ११ |
| अथ राशीनां वासस्थानमाह | १५ | ४ |
| अथ ग्रामवासे धारोपधारज्ञानमाह | ,, | ७ |
| अथ नामराशितोग्रामराशिविचारः | ,, | १३ |
| अथ ग्रामचक्रविचारः | ,, | १५ |
| अथ ग्रामनाम्नोर्वर्गविचारः | १६ | १ |
| अथ वर्गविचारः | ,, | ४ |
| अथैषां शरानाह | ,, | ८ |
| अथ वास्तौप्रशस्तविज्ञानमाह | ,, | १० |
| अथ गृहारम्भे मासविचारः | ,, | १५ |
| अथ० पक्षशुद्धिः | १७ | १ |
| अथ० तिथिशुद्धिः | ,, | ५ |
| अथ० नक्षत्रविचारः | ,, | १४ |
| अथ गृहारम्भे वारविचारः | ,, | १८ |
| अथ योगशुद्धिः | १८ | १ |
| अथ संमुखराहुविचारः | ,, | ३ |
| अथ दारुनिधानमाह ( त्रुटिरियम् ) | ,, | ५ |
| अथ द्वारनिर्म्माणविचारः | ,, | १९ |
| अथ गृहेशिल्पादिक्रियाविचारः | ,, | ११ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | पं० |
|---|---|---|
| अथ गृहकरणार्थं वास्तुविचारः | १८ | १७ |
| अथ लग्नशुद्धिः | १९ | १ |
| अथ सामान्यतो ग्रहशुद्धिविचारः | ,, | ५ |
| अथ गृहप्रवेशेविचारः | ,, | ८ |
| अथ०मासविचारः | ,, | १२ |
| अथ०तिथिविचारः | ,, | १६ |
| अथ०नक्षत्रविचारः | ,, | १९ |
| अथ०वासरविचारः | ,, | १९ |
| अथ स्त्रीणां चुल्हिकोपरिमृद्भाण्ड- | २० | १ |
| स्थापन-स्नान- दिवसमाह | ,, | ३ |
| अथप्रवेशविधानमाह | ,, | ६ |
| अथ गृहदेव्याः स्थापनविधिः | ,, | १० |
| अथ गृहसमीपे शुभाशुभवृक्षकथनम् | २१ | ९ |
| अथ वृक्षरोपणदिवसमाह | २२ | ७ |

## इति द्वितीयं गृहारम्भादिप्रकरणम् !

| | | |
|---|---|---|
| अथ हलप्रवाह-बीजवपन-सस्यरोपणप्रथम-<br>सस्यछेदनेषु तिथिशुद्धिमाह | २२ | १६ |
| अथ नवान्नभक्षणविचारः | २३ | ६ |
| अथान्ननिषेधविचारः | ,, | १० |
| अथ नूतनताम्बूलफलभक्षणविचारः | ,, | १४ |
| अथ धान्यादिमर्द्दनस्थानविचारः | ,, | १८ |
| अथ मेढिस्थापनविचारः | २४ | ३ |
| अथ कणमर्द्दनार्थदिवसमाह | ,, | १० |
| अथ बीजरक्षणदिवसमाह | ,, | १२ |
| अथ गृहादौधान्यादिस्थापनविचारः | ,, | १७ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | प० |
|---|---|---|
| अथ गृहाद्धान्यनिष्काशनविचारः | २५ | ३ |
| अथ वृद्ध्यर्थधान्यादिप्रक्षेपदिनम् | ,, | ६ |
| अथ धान्यादिमूल्यज्ञानम् | ,, | ८ |
| अथ रव्यादिवारे संक्रमणफलम् (त्रुटिरियं) | ,, | १३ |
| अथ पूर्वाह्णादिषु संक्रान्तिफलम् | , | १७ |
| अथ पुण्यकालव्यवस्था | २६ | ५ |
| अथ प्रथमहट्टाश्रासचक्रमाह | २७ | ४ |
| अथ फलमस्य | ,, | ८ |
| अथ क्रयविक्रयविचारः | ,, | १५ |
| अथऋणदानाऽऽदानप्रयोगदिवसः | ,, | १८ |
| अथ गवां क्रयविक्रयादिविचारः | २८ | ५ |
| अथ वाजिनां क्रयविक्रयदिवसः | ,, | १२ |
| अथाश्वादियानारोहणदिवसः | २९ | १ |
| अथगजन्तच्छेदनसज्जना दिवसः | ,, | ४ |
| अथमन्त्रग्रहणसमयमाह | ,, | ९ |
| अथान्नभक्षणशुद्धिः | ३० | ६ |
| अथात्रवारादिनियमः | ,, | ८ |
| अथमैत्रीकरणदिवसमाह | ,, | १२ |

## इति तृतीयं कृष्यादिप्रकरणम् ।

| | | |
|---|---|---|
| अथ पाणिग्रहण (विवाह)समयः | ,, | १६ |
| अथात्रगणविचारः | ३१ | १३ |
| अथात्रवर्णविचारः | ३२ | १ |
| अथात्रयोनिविचारः | ,, | ५ |
| अथवधूप्रवेशविचारः | ,, | १४ |
| अथद्विरागमनादिविचारः | ३३ | १० |

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | पं० |
|---|---|---|
| अथनवीनशय्याद्यारोहणदिवसमाह | ३४ | १४ |
| अथोद्वर्त्तनादि विचारः | ३५ | ३ |
| अथ वस्त्रप्रक्षालनविचार | ,, | ५ |
| अथ तैलाभ्यङ्गविचारः | ,, | ७ |
| अथात्रनिषिद्धप्रतीकारः | ,, | १० |
| अथपुंसांवस्त्रधारणदिवसः | ,, | १४ |
| अथ पुंसांभूषणपरिधानदिवसः | ,, | १७ |
| अथ स्त्रीणांवस्त्रपरिधानदिवसः | ३६ | १ |
| अथ सूचीकर्मदिवसः | ,, | ४ |
| अथस्त्रीणांलाक्षादिभूषणरक्तवस्त्रपरिधानदिवसमाह | ,, | ६ |
| अथात्रनिषिद्धदिवसमाह | ,, | १० |
| अथाद्यप्राकारम्भप्रमैथुनकर्मणोर्दिवसमाह | ,, | १२ |
| अथ स्त्रीणांकेशबन्धनदिवसमाह | ,, | १५ |


## इति तुरीयम् विवाहादि प्रकरणम् ।


| | | |
|---|---|---|
| अथाद्यरजोदर्शनेमासादिफलम् | ३७ | २ |
| अथप्रथमर्त्तौपरिधानवस्त्रफलम् | ,, | ९ |
| अथात्रवेलाफलम् | ,, | १८ |
| अथ शोणितवर्णफलम् | ३८ | १ |
| अथस्थानफलम् | ,, | ५ |
| अथस्नानविचारः | ,, | ९ |
| अथगर्भाधानविचारः | ,, | ११ |
| अथात्रविहितदिनादिविचारः | ३९ | ४ |
| अथ तिथिविचारः | ,, | ६ |
| अथात्रनक्षत्रविचारः | ,, | ९ |
| अथपुंसवनम् | ,, | १२ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | प० |
|---|---|---|
| अथसीमन्तकर्म | ३९ | १५ |
| अथगर्भाधानसमयात्प्रतिमासंमासाधिपकथनपूर्वक-गर्भस्थस्यावयवलक्षणमाह | ,, | १९ |
| अथप्रसूतिकागृहनिर्माणप्रवेशकालावाह | ४० | २१ |
| अथसूतीस्नानदिवसमाह | ४१ | २ |
| अथ शिशोर्मातुःस्तनपानदिवसमाह | ,, | ६ |
| अथमासपूर्त्तौसूतीजलपूजनदिवसमाह | ,, | ९ |
| अथशिशूनापालनाशयनदिवसमाह | ,, | १२ |
| अथ शिशोर्नामकरणम् | ,, | १५ |
| अथदोलाद्यारोहणम् | ४२ | ३ |
| अथताम्बूलदानदिवसमाह | ,, | ७ |
| अथगृहान्निष्क्रमणदिवसमाह | ,, | १० |
| अथशिशूनांभूम्युपवेशनम् | ,, | १२ |
| अथान्नप्राशनम् | ,, | १५ |
| अथ शिशोराद्यक्षौरमाह | ,, | २१ |
| अथनित्यक्षौरविधिः | ४३ | ६ |
| अथाद्यश्मश्रुकर्म | ,, | १० |
| अथ कर्णवेधः | ,, | १३ |
| अथाक्षरारम्भः | ,, | १७ |
| अथोपनयनदिवसमाह | ४४ | १ |
| अथ व्रात्यकालविचारः | ,, | ५ |
| अथ गुरुशुद्धिः | ,, | ७ |
| अथानिष्टगुरुप्रतीकारमाह | ,, | १२ |
| अथ रविविशुद्धिविचारः | ,, | १४ |
| अथ मासशुद्धिः | ,, | १८ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | प० |
|---|---|---|
| अथोपनयने चैत्रप्रशंसा | ४५ | १० |
| अथाशाखाधिपबलम | ,, | १३ |
| अथ तिथिशुद्धिः | ,, | २० |
| अथ नक्षत्रशुद्धिः | ४६ | २ |
| अथ तात्कालिकानध्यायाः | ,, | ८ |
| अथगलग्रहलक्षणम् | ,, | ९ |
| अथ प्रदोषलक्षणम् | ,, | ११ |
| अथाकालवृष्टिलक्षणम् | ,, | १३ |
| अथ लग्नशुद्धिः | ,, | १६ |
| अथ विद्यारम्भः | ४७ | १ |
| अथ धनुर्विद्यारम्भः | ,, | ७ |
| अथ राजाभिषेकः | ,, | १२ |

इति पञ्चमं संस्कारप्रकरणम् ।

| | | |
|---|---|---|
| अथ यात्रायाम्मासशुद्धिः | ४८ | ९ |
| अथात्रतिथिशुद्धिः | ,, | ११ |
| अथात्रनक्षत्रशुद्धिः | ,, | १३ |
| अथात्रवारशुद्धिः | ४९ | २ |
| अथानन्दादियोगविचारः | ,, | ८ |
| अथैषामानयनमाह | ,, | १४ |
| अथ ध्रुवादिभे यात्राविचारः | ,, | १८ |
| अथ चन्द्रस्थितिः | ५० | २ |
| अथ यात्रायां तत्फलमाह | ,, | ६ |
| अथ योगिनीविचारस्तत्र प्रथमं तिथियोगिनीविचारः | ,, | १४ |
| अथ वारयोगिनीविचारः | ५१ | ५ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | प० |
|---|---|---|
| अथ यामार्धयोगिनीविचारः | ,, | ७ |
| अथ राहुविचारस्तत्र प्रथमंमासराहुः | ,, | ९ |
| अथ तिथिराहुविचारः (त्रुटिरियं) | ,, | १२ |
| अथ वारराहुविचारः | ,, | १६ |
| अथ यामार्धराहुविचारः | ,, | २० |
| अथ राहुयुक्तयोगिनीबलप्रशंसामाह | ५२ | ४ |
| अथ ग्रहयोगेनयात्राविचारः | ,, | ७ |
| अथ यात्रायां व्यवस्थामाह | ५३ | ११ |
| अथ शकुनाः | ५४ | १ |
| अथापशकुनाः | ,, | १० |
| अथ नौकायानमाह | ५५ | ६ |
| अथ नृपदर्शनमाह | ,, | १२ |
| अथ परदेशगस्यागमनसमयविचारः | ,, | १४ |


## इति षष्ठं यात्राप्रकरणम् ।


| | | |
|---|---|---|
| अथ गृहागमनम् | ५६ | १ |
| अथ पुष्करण्यादिखननदिवसमाह | ,, | २ |
| अथात्र तिथिविचारः | ,, | ५ |
| अथ देवताघट्टनमुहूर्त्तमाह | ,, | ११ |
| अथ देवतडागादिप्रतिष्ठामाह | ,, | १५ |
| अथ गोचरविचारः | ,, | १९ |
| अथ पल्लीपतनशरटावरोहणफलमाह | ५७ | ६ |
| अथात्र लग्नफलमाह | ,, | २१ |
| अथ रोगोत्पत्तौ क्लेशदिवसविचारः | ५८ | ८ |
| अथ निश्चितनिधनकारकयोगाः | ,, | १७ |
| अथोत्पातरूपानिष्टफलम् | ५९ | ९ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | प० |
|---|---|---|
| अथ भैषज्यारम्भदिवसमाह | ६० | २ |
| अथ वस्तिविशोधनविरेचन व्रणादि-वेधानां विधिमाह | ,, | ८ |
| अथ रोगमुक्तस्नानदिवसमाह | ,, | ११ |
| अथ व्रणमुक्तस्नानदिवसमाह | ,, | १७ |
| अथ निषिद्धदिनाद्युत्पन्नरोगप्रतीकारः | ,, | १९ |
| अथ दीर्घजीविप्रसङ्गात्कविवंश्यानाह | ६१ | २ |
| अथ स्वोद्देश्य परिचयमुखेन ग्रन्थसमाप्तिमाह | ,, | ११ |

इति सप्तमं गृहागमनादि प्रकरणम् ग्रन्थसमाप्तिः ।


## अथ व्यवहाररत्नपरिशिष्टविषयसूची ।


| | | |
|---|---|---|
| अथादौदिननामानि | ६३ | ३ |
| अथ तिथिनामानि | ,, | ५ |
| अथ नक्षत्रनामानि | ,, | १० |
| अथ नक्षत्रस्वरूपम् | ,, | १६ |
| अथ योगनामानि | ६४ | ५ |
| अथैषां फलम् | ,, | १० |
| अथ (चल) करणानि | ,, | १५ |
| अथ स्थिरकरणानि | ,, | १८ |
| अथ राशिनामानि | ६५ | २ |
| अथैषांपर्यायकथनम् | ,, | ४ |
| अथैषांवर्णभेदाः | ,, | ७ |
| अथैषांक्रूरसौम्यादिविवेकः | ,, | ९ |
| अथैषां स्वामिनः | ,, | १३ |
| अथैषां मानम् | ,, | १६ |
| अथ प्रत्यंशेभुक्तराशिमानम् | ६६ | २ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | प० |
|---|---|---|
| अथ मासनामानि | ,, | ७ |
| अथर्तुनामानि | ,, | १० |
| अथर्तुलक्षणानि | ,, | १२ |
| अथ शतपदचक्रम् | ६७ | १ |
| अथ जन्मनक्षत्रज्ञानम् | ६८ | १ |
| अथ जन्मर्क्षतोराशिविचारेचन्द्रावस्थितिमाह | ७० | १ |
| अथात्र श्लोकाः | ,, | १३ |
| अथ जन्म-नाम-राश्योः कार्यभेदेन निर्णयः | ७१ | ३ |
| अथ दिनदिक्शूलम् | ,, | ५ |
| अथ तच्छान्तिः | ,, | ८ |
| अथ नक्षत्रदिक्शूलम् | ,, | १३ |
| अथ सर्वदिग्द्वारिनक्षत्राणि | ,, | १७ |
| अथ तिथिवारयोगेऽमृतयोगः | ७२ | २ |
| अथामृतसिद्धियोगः | ,, | ५ |
| अथास्यापवादमाह | ,, | ७ |
| अथानन्दयोगः | ,, | १० |
| अथ विषयोगः | ७३ | १ |
| अथमृत्युयोगः | ,, | ५ |
| अथ सिद्धिविरुद्धौ | ,, | ७ |
| अथ तिथिवारयोगे निषिद्धफलम् | ७४ | १० |
| अथ वारनक्षत्रयोगे मृत्युयोगः | ,, | १४ |
| अथ यात्रायां शुभाशुभमध्यमर्क्षाणि | ,, | १७ |
| अथ यमघण्टः | ७५ | १ |
| अथ चन्द्रविचारः | ,, | ७ |
| अथ यात्राकाले चन्द्रफलम् | ,, | ९ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| विषय | पृ० | पं० |
|---|---|---|
| अथ दुष्टचन्द्रादिशान्तिः | ,, | ११ |
| अथ दिननक्षत्रयोगेऽमृतयोगः | ,, | १४ |
| अथशुभयोगः | ,, | १७ |
| अथा शुभयोगः | ७६ | १ |
| अथ यमदंष्ट्रा | ,, | ५ |
| अथ लग्नयोगाः | ,, | १० |
| अथ यात्रास्थानव्यवस्था | ,, | १४ |
| अथ प्रस्थानवस्तूनि | ,, | १७ |
| अथ शकुनानि | ,, | २० |
| अथापशकुनेषु क्षुतम् | ७७ | १० |
| अथ दिवाइष्टकालज्ञानम् | ,, | १६ |
| अथ रात्रौ लग्नज्ञानम् | ७८ | ३ |
| अथ प्रकीर्णकाः तत्रवारफलम् | ,, | ९ |
| अथ तिथीनां नामभेदेन फलभेदकथनम् | ,, | १९ |
| अथाधोमुखनक्षत्राणि तत्फलंच | ७९ | ४ |
| अथोर्ध्वमुखनक्षत्राणि तत्फलंच | ,, | ८ |
| अथ तिर्यङ्मुखनक्षत्राणि तत्फलंच | ,, | १२ |
| अथ वारवेलामाह | ८० | १ |
| अथ कालवेला | ,, | ३ |
| अथ वारकालकुलिकवेलामाह | ,, | ६ |
| अथ विशिष्य कालवेलाफलम् | ,, | १६ |
| अथ गृहणदर्शनफलम् | ,, | १८ |


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

* श्रीः *

अथ तत्रभवान् मिथिलामहीमण्डन-खौआलवंसावतंस-महामहोपाध्याय—नन्दनशर्म्मणान्तनुजन्मा, निजकुलकमलिनीनाथोदैवज्ञ-शिरोमणि 'भनि' ति प्रसिद्धोभानुनाथोमिथिलाभिजनानामन्तेवसतां समुपयोगाय प्रामाणिकज्योतिर्निबन्धेभ्योव्यवहारोपयोगीनिबचन-रत्नानि संगृह्यार्थतोनव्येनपद्यबंधेनकचित्कचित्माक्तनेनापि ग्रन्थमिमं प्रणिनाय, अत्र चाधुनिकाल्पमतिकजनोपयोगाय अवकहड़ा (होढ़ा) चक्रादिकं परिशिष्टरूपेण दातुमुत्कलिकावता श्रीमद्रमेश्वरयन्त्रालया-धिपतिना सबहुमानंप्रोत्साहितेनमया क्वचित्क्वचिदुपयुक्तटिप्पण्या-पिसनाथीकृत्यायं ग्रन्थोमुद्रापयितुन्तस्मैससर्वाधिकारमर्प्पितोऽस्ति ।

अयञ्च भानुनाथशर्म्मा लोकोक्तिचतुरोऽनेकेषांगून्थरत्नाना-म्प्रणेता पिलखवाडग्रामे नवचन्द्रभुजभू ( १२१९ ) मिते यावनाब्दे माघकृष्णत्रयोदश्यां लब्धजन्मा द्वाविंशतितमसमदेशीयवयाएव शा-स्त्रेपरां प्रौढिमासाद्यपरश्शतानन्तेवसतोऽतिविद्यानकृतज्यौतिषे ।

गून्थाश्च यथावसरमेतत्प्रणीतायथोपलब्धि नामतोनिर्दिश्यन्ते "बीजगणितटीका" आर्यासप्तशतीटीका" प्रभावतीहरणनाटिका" श्रीकुलदेवतार्चापद्धतिः । वाताह्वानं, व्यवहाररत्नञ्चेति ॥

षट्सप्ततितमेच जन्मतोगतेब्दे वाणरत्नभुजभूमिते (१२९५) यावनाब्दे अधिमिथिलं सिद्धिक्षेत्रे श्रीमत्कपिलेश्वरशिवसन्निधौ पौष-शुक्लचतुर्थ्यामयम्ब्रह्मभूयङ्गतः ।

ग्रंथश्चायं पुराऽधिवाराणसि श्रीवटुकनाथशर्म्मणा मुद्रापयित्वा प्रकाशितोऽनातीवपरिशुद्धोपि साम्प्रतन्दुर्लभतमः संवृत्त इतिपुनर्मुद्र-णेस्यमतिरास्थिता "श्रीरमेश्वर" यन्त्रालयाधिपतिना ॥

तदत्रास्मादृशाल्पज्ञजनपरिशोधिते विशेषतो ज्यौतिषग्रन्थे-ऽशुद्धिसद्भावस्यावश्यम्भावमाशङ्कमानेनमयागुणैकपक्षपातिनोदूषण--वाचय्यँमास्सुधियः सबहुमानंप्रार्थ्यन्ते यदवधानेनाकलय्यादोग्रंथरत्नं लोकोपकृतयेऽलंन्तेकरिष्यंतीति—

निगदति—पं० श्रीमुकुन्दझा बख्शी

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्रीः ।

# व्यवहार-रत्न-प्रारम्भः ।

श्रीगणेशाय नमः ॥ नत्वा मुकुन्दस्य पदारविन्दं स्वर्गापवर्ग-द्रुमराज[1]-कन्दम् ॥ श्रीभानुनाथः कृतचारुयत्नं करोम्यहंसद्व्यवहाररत्नम् ॥१॥ स्वकृतपरकृतार्थां संग्रहोऽयं मदीयः सुललितपदरम्यः सर्वलोकाधिगम्यः॥ निखिलवर[2]कुलानां मैथिलानामिदानीं जनयतु परितोषं त्यक्तनिश्शेषदोषम् ॥२॥ काव्यं श्रीभानुनाथस्य प्राचीनगणकस्य च ॥ माधुर्य्यमनयोर्ज्ञेयं शर्कराक्षीरयोरिव ॥३॥ दुर्ज्जनैरपि क्षंतव्यमपराधद्वयं मम ॥ सज्जनानां विनोदाय यतो ग्रन्थं करोम्यहम् ४ विनोपदेशं खलु बालकानां चेतो विशुद्धिर्न विधानपूर्वा ॥ यतस्ततः प्रागुपदेशमेव क्रमेण वक्ष्यामि हितञ्च तेषा[3]म् ॥५॥ एकस्मिन्वत्सरे मासाश्चैत्राद्या[4] द्वाद-

---

१ स्वोनामनिरतिशयसुखन्तद्गमयतिप्रापयतीतिस्वर्गोलोकविशेषोऽपवर्गोमोक्षस्तयोरर्थे द्रुमराजस्य कल्पवृक्षस्यापि कन्दम्मूलभूतं तदिवसंवितं शरणागतानामभिमतार्थपूरकमितिभावः । अत्रस्वर्गउपलक्षणम्प्रार्थ्यवस्तुनः ॥

२ सर्वविधकुलीनानाम् ॥

३ तेषाम् बालकानाम् । हितमुपदेशमेव प्राक्प्रथमं क्रमेण (प्रकरणरूपेण) वक्ष्यामीत्यन्वयः ॥

४ एषचभास्कराचार्यसम्मतोवर्षारम्भश्चैत्रशुक्लप्रतिपदमारभ्यशु-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्लादिचान्द्रमासक्रमेणविक्रमार्कप्रवर्त्तितइहोपन्यस्तः । तथाचसिद्धा-न्तशिरोमणौ–"लंकानगर्यामुदयाच्च भानोस्तस्यैववारेप्रथमं बभूव ॥

मधोः सितादेर्दिनमासपक्षयुगादिकानां युगपत्प्रवृत्तिः"॥इति॥ चान्द्रः प्रभवादिवत्सरोऽपि चैत्रसितएवप्रवर्त्तते । बार्हस्पत्यस्तुमा-घादौ । तयोर्विनियोगोज्योतिर्निबन्धे ब्रह्मसिद्धान्ते–

"व्यावहारिकसंज्ञोऽयं कालः स्मृत्यादिकर्मसु । योज्यःसर्वत्रतत्रा-पि जैवोवा नार्म्मदोत्तरे" । इति । जैवोबार्हस्पत्यः । अयमेवचान्द्रस-म्वँत्सरोऽप्युच्यते । यदाह आर्ष्टिषेणः।"स्मरेत्सर्वत्रकर्म्मादौचान्द्रं संव-त्सरं सदा । नान्यंयस्माद्वत्सरादौ प्रवृत्तिस्तस्यकीर्त्तिते"ति॥दीपिका-यामपि । " चान्द्रोब्दोमधुशुक्लगप्रतिपादारम्भ " इत्युक्तम् । बार्ह-स्पत्यः प्रभवादिवत्सरोऽयनक्रमेणसौरमाघादौ प्रवर्त्तते । उत्तरायणं हिदेवानान्दिनम्मकरादिषट्क, न्दक्षिणायनं रात्रिः कर्कादिषट्क-मितिस्थितिः । वस्तुतस्तु । चैत्राद्याइत्युक्त्या कृष्णादिमासक्रमेण चैत्रकृष्णादिकएववर्षारम्भसमयोयुक्तः । ऋतुक्रमस्यापि कृष्णादिमा-सक्रमेणैवप्रवृत्तेर्म्मधुमाधवौवसन्तः इत्येवं) । सएव ब्राह्मणानामग्न्या-धानकालतया "वसन्तेब्राह्मणोऽग्नीनादधीते-,,तिश्रुतिसिद्धः । वर्षार-म्भसमयत्वात् । शुक्लादिमासस्तुविन्ध्यदक्षिणएवप्रवर्त्तते । तथाचो-क्तं दाक्षिणात्यनिबन्धे ( निर्णयसिन्धौ ) त्रिकाण्डमण्डनेन—

"कृष्णपक्षादिकम्मासं नांगीकुर्वन्ति केचन ।
येऽपीच्छन्ति न तेषाम-पीष्टोविन्ध्यस्य दक्षिणे" ॥इति॥

अतएवद्वैतनिर्णये--दर्शश्राद्धादौकृष्णादिरेवमासोनिर्देश्यः । त-स्यतत्तत्तिथिपुरस्कारेणैवकरणात् । इत्युक्तं वाचस्पतिमिश्रैः॥ अतएव फाल्गुनान्त एवसम्वँत्सरान्तोमिथिलायां पांशुलपादिकैर्होलिकैरपि "अद्यसम्वँत्सरोदग्ध"इति होलिकादाहांते प्रयुज्यते॥ व्यावहारिकोवर्ष-क्रमस्तु–यथाराजशासनं प्रवर्त्तते । युक्तिरपितत्रोपयुज्यते एव । यथाऽ-श्विन्यांमेषेरविरिति सौर मेषादिसङ्क्रान्तिक्रमसिद्धोवत्सरारम्भः शा-लिवाहनराजप्रवार्त्तितस्तदीयशकाब्दतयाख्यातःसौरवैशाखादिक्रमेणैव

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शैव हि ॥ तेऽपि नाम्नः प्रभेदेन चत्वारः स्युः प्रकार-का[१]: ॥ ६ ॥ सौरश्च सावनश्चैव नाक्षत्रश्चान्द्र एव च ॥ एतैरेव समस्तोऽपि व्यवहारः प्रवर्त्तते ॥ ७ ॥ विवाहा[२]-

---

सर्वैर्व्यवहृतः ॥ एवमन्योऽपि ॥ स्वतन्त्रास्तु—होराचक्रे कृत्तिकाया एवकालचक्रप्रवर्त्तकत्वस्यस्वरशास्त्रोक्ताकारादिवर्णक्रमसिद्धतयातद्यु-क्तपौर्णमास्युपलक्षितःकालोवत्सरान्तः । सचकार्तिकः । कृत्तिकायु-क्तापौर्णमासी कार्त्तिकी,कार्तिकीपौर्णमासी अस्मिन्निति कार्त्तिकोमास इति पाणिनीयैःपरिभाषितः । "सास्मिन् पौर्णमासीतिसंज्ञायाम् (४।२।२१) इति अण् ॥ कृत्तिकाचवत्सरादिर्भम् । (ततःपरमेव नव्यवत्स-रारम्भः ) अतएवचाग्रेहायनमस्मादित्यग्रहायणः स एवाग्रहायणिकः "विनयादित्वात्,, ( ५।४।३४ ) स्वार्थेठक्प्रत्ययस्तद्धितः ॥ "स-म्वँत्सरोवत्सरोऽब्दोहायनोऽस्त्री शरत्समा" इतिचामरः ॥ हेमन्तादि-कएवऋतुः । मार्गशीर्षादिकएवमासोवत्सरारम्भेऽमरकोशकारादिभिर-प्यभ्युपेतः ॥ अतएवकार्त्तिक्यां ( पौर्णमास्यां ) सर्वदेवोत्थानादिः पौराणिकः पञ्चाङ्गेष्वपि सर्वैरुपन्यस्यते ॥ इत्याहुः ॥ मासानांद्वा-दशत्वंतुराशिभेदेन'द्वादशादित्या' इति मत्वोपपद्यते । तिथिरपिसूर्या-चन्द्रमसोर्द्वादभिरन्तरांशैरेव भवतीति स्फुटमनुपदं वक्ष्यते ॥

१ प्रकारैर्भेदैः काय्न्ते शब्दयन्तइतिप्रकारकाः । कैशब्दे ( भ्वा. प.से. ) ततः "सुपी"-(३।२।४)—तियोगविभागाद्बाहुलकाच्चकर्मणि कप्रत्ययः । आत्व "मातोलोपः"(६।४।६४)तावद्भेदभिन्ना इत्यर्थः ॥

२ अत्रादिपदं यात्राग्रहचारपरम् । यत्कर्म सूर्यभोग्यराश्युल्लेखेन, यच्चविशिष्योदगयनादिविहितन्तत्परञ्च । अयनस्य सौरमासघटितत्वे-नव्यवस्थापनात् ॥ तच्च चूडोपनयनादि । तदेतत्पितामहवचनार्थम् ॥ ज्योतिर्गर्गोऽपि । "सौरोमासोविवाहादौ यज्ञादौ सावनःस्मृतः । आब्दिके पितृकार्येच चान्द्रोमासः प्रशस्यत" इति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दौ स्मृतः सौरो यज्ञादौ सावनस्तथा ।। क्षौरपैत्र्यादिके

१ अत्रादिपदं सत्र–भृति. वृद्धि–प्रायश्चित्ता–ऽऽयुर्दाया–ऽशौच–गर्भाधान-पुंसवन-सीमन्तोन्नयन-नामकरणा–न्नप्राशन-निष्क्रमणादि-परम् । तथाचविष्णुधर्म्मोत्तरे—

"अध्वायनं च ग्रहचारकर्म सौरेण मानेन सदाव्यवस्येत् ।।

सत्राण्युपास्यान्यथसावनेन लोक्यञ्चयत्स्याद्व्यवहारकर्म" ।।इति।। अध्वायनं यात्रा । चादुक्तसमुच्चयः । सत्राणि गवामयनादीनि मासमव्वँत्सरसाध्यानि । लोक्यं व्यवहारकर्म भृति-वृद्ध्यादिकय्यँथोपन्यस्तम् ।। तथाचज्योतिर्गर्गः । "आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा । सावनेन तु कर्त्तव्या मन्त्राणामप्युपासने"ति ।।

२ क्षौरपैत्र्ये क्षुरकर्मादिकंपितृकर्माब्दिकं (वार्षिक) श्राद्धम् क्षौरपैत्रचंतस्मिन् । आदिनापार्वणाष्टकाश्राद्धादि । तथाचऋष्यशृङ्गपराशरौ–"विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते । पार्वणेत्वष्टकाश्राद्धेचान्द्रमिष्टंतथाब्दिके" इति ।। अत्र चान्द्रं कृष्णादि ।। व्रतंचात्र मौञ्जीबन्धनादि (उपनयनादि) यज्ञपदमुदगयनादिविहितपशुयागादिपरम् । पार्वणेत्वित्यादि पर्व- ( कालविशेष- ) विहित- तिथिकृत्योपलक्षकम् । तथा च ब्राह्मे "तिथिकृत्येचकृष्णादि व्रते शुक्लादिमेव च । विवाहादौच सौरादिमासं कृत्येविनिर्दिशेदि"ति ।। "चान्द्रेणतिथिकृत्यन्तु यथाविहितमाचरेदि"तिदक्षोक्तेश्च । तथाच क्षौरपैत्र्यादिके तिथिव्रतेच चान्द्रइत्यन्वयोद्रष्टव्यः ।। नाक्षत्रव्रते नाक्षत्रमासस्यानुपयोगोऽत्राभिसंहितः । तथाचात्रतिथिव्रतइत्यनेन नाक्षत्रव्रतव्युदास एव तात्पर्यविषयः । तथाच विष्णुधर्म्मे "स्मृतितत्त्व–(रघुनन्दनीयाष्टाविंशतितत्व-) धृते–

"उपोषितव्यंनक्षत्रंयस्मिन्नस्तमियाद्रविः । युज्यते यत्र वा तारानिशीथे शशिनासहे"ति । माधवीयेस्कान्दे—

"तत्रैवोपवसेदृक्षेयन्निशीथादधोभवेत् । उपवासे ऽदृच्छं स्या-

चान्द्रो नाक्षत्रश्च तिथिव्रते ।। ८ ।। रविसंक्रान्तितः सौरः

तद्दिनक्तैकभक्तयोरि"ति । नाक्षत्रप्रयोजनन्तु तत्रैव ( स्मृतितत्त्वे ) विष्णुधर्म्मोत्तरे—

"नक्षत्रसत्राण्ययनानि चेन्द्रोर्म्मासेन कुर्याद्भगणात्मकेने" ति । नक्षत्रसत्राणिमाससाध्ययागविशेषरूपाणि याज्ञिकप्रसिद्धानि । इन्द्रोरयनानि सोमायनाख्यसत्राणि । इतिसमयप्रकाशः । एवं जन्मनक्षत्रे शनिभौमवारफलन्नाक्षत्रमासेन, योग्यत्वात् । यथाह दीपिकायाम्—

"जन्मन्यृक्षे यदास्यातांवारौभौमशनैश्चरौ । समासः कल्मषोनाममनोदुःखप्रदायकः" । इति । अन्यत्रापि " जन्मर्क्षयुक्ता यदि जन्ममासे यस्यध्रुवंजन्मतिथिर्भवेत्तु । भवंतितद्वत्सरमेवसम्यक् नैरुज्यसम्मानसुखानि तस्ये"ति ।। अयमेवनाक्षत्रोवत्सरः कैश्चिदुच्यत इति जन्मर्क्षादिकोमासोजन्ममासोनाक्षत्रस्तत्र क्षौरविचारोऽपि निषेधमुखेन शास्त्रेदर्शितइति क्षौरेनाक्षत्र इत्येवमवरोहणक्रमेण यथासंख्यान्वयोऽप्यत्रकेषाञ्चिदभिमतः ।। अत्रविशेषतोनाक्षत्रमासप्रयोजनानुक्तिस्तु बालानांयथोपयोगमेवात्र प्रयोजनोक्तेःप्रतिज्ञानात् त्रिविधमासस्यैव व्यवहारकृत्ये समुपयोगात् । तथाचोक्तं स्मृति तत्वे—" मैथिलास्तु—"विवाहादौस्मृतः सौरो यज्ञादौसावनोमतः । शेषकर्माणिचान्द्रः स्याद्रूषमासविधिः स्मृत " इति ।। शेषे-सौरादिविशेषोल्लेखरहिते । इत्याहुरि"ति ।।

---

१ सूरः सूर्यः "सूरसूर्यार्यमादित्यद्वादशात्मदिवाकरा" इत्यमरः तत्कृतः सौरः । रवेर्म्मेषादिराशिषु संक्रमणात्प्रवृत्तः । तत्प्रवृत्तिरंश क्रमेणप्रसिद्धा । तथा चायं त्रिंशद्दिनात्मकोनियतः । सवनोयज्ञः सवोऽध्वरोयाग इत्यनर्थान्तरम् । "यज्ञःसवोऽध्वरोयागः सप्ततन्तुर्मखःक्रतुरि"त्यमरः । तदारम्भोपलक्षितः कालः सावनः उदयादुदयं यावत्त्रिंशद्दिनात्मकएवमासः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सावनस्तूदयावधिः ॥ नाक्षत्रोभभ्रमादिन्दोश्चान्द्रस्त्रिंशत्तिथेः स्मृतः ॥ ९ ॥ चान्द्रोऽपि द्विविधः प्रोक्तः शुक्लकृष्णानुसारतः ॥ सूर्य्यचन्द्रान्तरांशैस्तु ज्ञेया द्वादशभिस्तिथिः ॥१०॥ ❋ अथ तिथीशानाह ❋ वह्निर्ब्रह्माम्बिका चैव गणेशोऽहिर्गुहो रविः ॥ शिवो दुर्गा यमो

१ तथाचनिर्णयसिन्धौ " चन्द्रस्यसवनक्षत्रभोगेननाक्षत्रोमास " इति ॥ अयन्तु सप्तविंशतिदिनात्मकएव ॥ तावन्मितत्वान्नक्षत्राणाम् ॥

२ तथाचनिर्णयसिन्धौ त्रिकाराण्डमण्डनः । " चान्द्रोऽपि- शुक्लपक्षादिः कृष्णादिर्वेतिचद्विधे "ति । शुक्लादिरमान्तः । कृष्णादिःपूर्णिमान्तोऽनियतदिवसात्मकस्थितिरितथीनांत्राणवृद्धिरसक्षययोज्योतिर्निबन्धसिद्धत्वात् ॥

३ द्वादशभिः सूर्य्यचन्द्रान्तरांशैस्तिथिर्ज्ञेयेत्यन्वयः । तथाच गोभिलः । "सूर्याचन्द्रमसोर्यः परः सन्निकर्षः साऽमावास्या" इति । परः सन्निकर्षश्च । उपर्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकांशावच्छेदेन महावस्थानरूपः । तथाचामावास्याघटकताद्दशसहावस्थानमुक्तार्कमण्डलाच्चन्द्रमण्डलस्य "अर्काद्विनिसृतःप्राचीं यद्यात्यहरहः शशी । भागैर्द्वादशभिस्तत्स्यात्तिथिश्चान्द्रमसं दिनम्" । इति सूर्यसिद्धान्तोक्तेः । "त्रिशांशकस्तथाराशेर्भाग इत्यभिधीयते । आदित्याद्विप्रकृष्टस्तु भागंद्वादशकंयदा । चन्द्रमाःस्यात्तदाराम ! तिथिरित्यभिधीयते" इति विष्णुधर्म्मोत्तरवचनाद्राशिद्वादशांशद्वादशांसभोगात्मकनिर्गमरूप वियोगेन शुक्लायाः प्रतिपदादि तत्तत्तिथेरुत्पत्तिरित्येवं "सूर्याचन्द्रमसोर्यः परोविप्रकर्षः सा पौर्णमासी" इति गोभिलोक्तेन पौर्णमासीघटकसप्तमराश्यवस्थानरूपपरमवियोगानन्तरमर्कमण्डल— प्रवेशाय चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांसभोगात्मकप्रवेशरूप— सन्निकर्षेण कृष्णायास्तत्तत्तिथेश्चोत्पत्तिः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विश्वे विष्णुः कामः शिवःशशी ॥ ११ ॥ पक्षत्या[1]दिति-
थीनान्तु पक्षयोरुभयोरपि ॥ एते देवगणाः सर्वे पतयः
स्युर्यथाक्रमम् ॥ १२ ॥ ❀ अथ तिथीनांविशेषसंज्ञामाह ❀
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयःक्रमात् ॥ वार-
त्रयं समावृत्य भवन्ति प्रतिपन्मुखाः ॥ १३ ॥ ❀ अथ
सिद्धियोगाः ❀ शुक्रे नन्दा बुधे भद्रा गुरौ पूर्णा कुजे
जया ॥ शनौ रिक्ता शुभा ज्ञेया सर्वकार्येषु धीमता[2] १४
❀ अथ निद्ययोगाः ❀ आदित्यभौमयोर्नन्दा भद्रा
भार्गवचन्द्रयोः ॥ बुधे जया गुरौ रिक्ता शनौ पूर्णा-
तिनिन्दिता ॥ १५ ॥ ❀ अथ दग्धातिथिः ❀ चापे
मीने द्वितीया च चतुर्थी वृषकुम्भयोः ॥ षष्ठी मेषे
कुलीरा[3]ख्ये कन्यायुग्मे तथाष्टमी ॥ १६ ॥ दशमी वृश्चि-
के सिंहे द्वादशी मकरे तुळे ॥ एतास्तु तिथयो दग्धाः
शुभे कर्म्मणि वर्जिताः ॥ १७ ॥ ❀ अथ भद्राविचारः ❀
अष्टम्यां पूर्णिमायाञ्च शुक्ले पूर्वदले स्मृता ॥ एका-
दश्याञ्चतुर्थ्याञ्च तथा भद्रा परे दले ॥ १८ ॥
कृष्णेऽन्त्यार्द्धे तृतीयायां दशम्यामपि संस्थिता ॥ सप्त-
म्याञ्च चतुर्द्दश्यां पूर्वे भागे तथैव च ॥ १९ ॥ मह-
द्विध्वंसिनी या च नित्यं दुःखप्रदायिनी ॥ सा भद्रा

---

१ पक्षतिः पक्षमूलं प्रतिपत् । "पक्षात्तिः" (५।२।१५) इति । तिप्रत्यय स्तद्धितः ॥ २ शनिभौमगतारिक्तासर्वसाम्राज्यदायिनीत्यन्यत्रोक्तम् ३ कर्कटके । "स्यात्कुलीरः कर्कटक" इत्यमरः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वर्ज्जनीया स्यात्सर्वकार्य्ये सदा बुधैः ॥ २० ॥ क्रूरका-
र्य्ये खरोष्ट्रादेः क्रयादौ समरेषु च ॥ भद्रा प्रशस्ता
विज्ञेया सर्वथा दैवचिंतकैः ॥ २१ ॥ ❀ अथ भद्रावास-
माह ❀ आदावष्टघटी स्वर्गे ततः षोडश भूतले ॥ त-
दूर्द्ध्वं षट्च पाताळे भद्रा त्रिंशद्घटी क्रमात् ॥ २२ ॥
स्वर्गे च लभते सौख्यं पाताळे च धनागमम् ॥ मर्त्य-
लोके भवेच्चिन्ता एवं भद्राफलंस्मृतम् ॥२३॥ ❀ अथ
चन्द्रावस्थितराशिविशेषेण भद्रावस्थितिमाह ❀ वृषभ-
मिथुनमेषे वृश्चिके स्वर्गलोकं ॥ जलचर[1]घटसिंहे कर्क्कट[4]
भूतळेषु ॥ युवति[2]मृगतुलायां का[3]र्म्मुके नागलोकं भ्र-
मति जगदिदं सा कार्य्यनाशाय विष्टिः ॥२४॥ को-
जागरोत्सवे चैव होलिकोत्सवकर्म्मणि ॥ भद्रा विव-
र्ज्जनीया स्यान्मिथिलायां विशेषतः ॥ २५ ॥ ❀ अथ
नक्षत्रस्वामिविचारः ❀ अ[5]श्वो यमोऽन[6]लो ब्रह्मा द्विज-
रा[7]जस्त्रि[8]लोचनः ॥ देवमा[9]ता गु[10]रुः सर्प्पः पितरो भग-
एव च ॥ २६ ॥ अ[11]र्य्यमा द्यु[12]मणिस्त्वष्टा मारुतो वास[13]-
वानलौ ॥ मित्रो[14] महेन्द्रो निर्ऋतिर्ज्जलं विश्वे[15] विधिस्त-

[ १ ] मकर-कुम्भ-[ २ ] कन्या-मीन- ( ३ ) धनुषि ( ४ ) भद्रा ( ५ ) अश्विनीकुमारौ [ नासत्याभिधानौ ] च [ ६ ] अग्निः (७) चन्द्रः (८) शिवः (९) अदितिः (१०) बृहस्पतिः (११) सूर्यः ( १२ सूर्यः ( १३ ) इन्द्राग्नी, तेनैतद्द्विदेवतम् ( १४ ) तन्नामको देवविशेषः : अपानेन्द्रियदेवता । [ १५ ] विश्वेदेवाः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

था ॥ २७ ॥ गोविन्दो वसुतोयेशास्त्वजपाच्च यथाक्रमम् ॥ अहिर्बुध्नश्च पूषा च ऋक्षेशास्ते प्रकीर्त्तिताः २८ ❋ अथ नक्षत्राणांविशेषसंज्ञामाह ❋ चरं चलं स्मृतं स्वातीपुनर्वसुश्रुतित्रयम् ॥ क्रूरमुग्रं मघा पूर्वात्रितयं भरणी तथा ॥ २९ ॥ ध्रुवं स्थिरं विनिर्दिष्टं रोहिणी चोत्तरात्रयम् ॥ तीक्ष्णं दारुणमाश्लेषाज्येष्ठार्द्रामूलसंज्ञितम् ॥३०॥ लघु क्षिप्रं स्मृतं पुष्यो हस्तोऽश्विन्यभिजित्तथा ॥ मृदु मैत्रं स्मृतं चित्रानुराधा रेवती मृगः ३१। मिश्रं साधारणं प्रोक्तं विशाखा कृत्तिका तथा। नक्षत्रेष्वेषु कर्म्माणि नामतुल्यानि कारयेत् ॥३२॥ ❋ अथ ताराविचारः❋ जन्मभादिष्टनक्षत्रं गणयित्वा प्रयत्नतः॥ नवभिश्च हरेद्भागं शेषं ताराःप्रकीर्त्तिताः।३३।जन्मसम्पद्विपत्क्षेम प्रत्यरिःसाधको वधः॥ मित्रातिमित्रौ प्रख्यातास्तारानामसदृक्फलाः ।३४। ❋अथ दुष्टताराशांतिमाह ❋ प्रत्यरौ लवणं दद्याच्छाकमात्रं त्रिजन्मसु॥ शुद्धं

(१) स्वात्याख्यं नक्षत्रम। पुनर्वसू श्रवणादित्रयंचेति ५। एवमग्रेऽपि विधेयेषु नपुंसकत्वमुपपाद्यम् ॥ चलंस्थिरमित्येवं पर्यायकथनं स्पष्टप्रतीत्यर्थम् ॥ (२,अत्र ''धनदासुखदाचैव मृत्युदाचैवपंचमी'' त्युक्तेस्तृतीयावृत्तिगतैव पंचमी तारा निषिद्धा ॥ अत्र श्रीपतिसमुच्चये सर्वमङ्गलकार्याणितृषुजन्मसुकारयेत् । विवादश्राद्धभैषज्ययात्राक्षौरादि वर्जयेत् ॥ यात्रायां पथि बन्धनंकृषिविधौ सर्वस्य नाशोभवेत् भैषज्येमरणं तथा सुनियतं दाहोगृहारम्भणे। क्षौरेरोगसमागमोबहुविधः श्राद्धेऽर्थनाशस्तथा वादेबुद्धिविनाशनं युधिभयं प्राप्नोत्ययं जन्मभे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गुणं विपत्तौ च वधे हेम तिलैः सह ॥३५॥ ❋ अथ (संक्षेपेण) चन्द्रावस्थितिविचारः ❋ अश्विनी भरणी सर्वा कृत्तिकैकपदापि च ॥ नवभिर्नवभिः पादैरेवं मेषवृषादयः ॥ ३६ ॥ ❋ अथ मेषादीनां संज्ञान्तरमाह ❋ चराख्यश्च स्थिराख्यश्च द्विस्वभावाभिधोऽपि च ॥ त्रिभिस्त्रिभिश्च मेषाद्यैर्ज्ञेया द्वादश राशयः ॥ ॥ ३७ ॥ क्रूराक्रूरौ मेषवृषौ युग्मकर्क्कौ तथैव च ॥ द्वाभ्यां द्वाभ्यामनेनैव क्रमेण परिकीर्त्तितौ ॥ ३८ ॥ ❋ अथ चन्द्रानयनमाह ❋ ॥ जन्मराशिं समारभ्य दिनभं गणयेद्बुधः ॥ यावन्मिता भवेत्संख्या तावदेव हि चन्द्रमाः ॥ ३९ ॥ रिष्फाष्टतुर्य्यगं[1] हित्वा सर्वे चन्द्राः शुभप्रदाः ॥ सर्वेषु शुभकार्य्येषु विज्ञयाः सूरिभिः सदा ॥४०॥ ❋ अथ चन्द्रवर्णज्ञानमाह ❋ मेषालिसिंहगश्चन्द्रो रक्तवर्णस्तुमध्यमः ॥ वृषकर्कतुलासंस्थः श्वेतः सिद्धिप्रदायकः ॥ ४१ ॥ मीने धनुर्द्धरे युग्मे पीतः शर्म्मविवृद्धिदः । कन्यामकरकुम्भेषु कृष्णवर्णो भयप्रदः ॥ ४२ ॥ ❋ अथ चन्द्रताराबलकथनम् ❋ कृष्णे बलवती तारा शुक्लपक्षे तु चन्द्रमाः ॥ तयोर्बलं सदा ग्राह्यं सर्वेषु शुभकर्म्मसु ॥ ४३ ॥ मासे तु शुक्ल प्रतिपत्प्रवृत्ते पूर्णः शशी मध्यबलो दशाहे ॥ श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैश्च दृष्टो बलवान् सदैव

१ रिष्फो द्वादशस्तुर्य्यश्चतुर्थः ॥ "गृहप्रवेशेयात्रां चन्द्रोद्वादशगः शुभः" इतित्वन्यत्रोक्तम् ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

॥ ४४ ॥ ❋ अथ निषिद्धचन्द्रस्य शान्तिः ❋ शङ्खं दद्याद्द्विजातिभ्यो हिमांशौ विफले सति ॥ शङ्खाभावे महत्स्वच्छं तण्डुलं वा नवं दधि ॥ ४५ ॥ ❋ अथ घातचन्द्राद्यमाह ❋ जन्मेन्दुनन्दार्क्कमघा च मेषे बृषे शनिः पञ्चमहस्तपूर्णाः स्वाती च युग्मे नवचन्द्रभद्राः कर्क्केऽनुराधाबुधयुग्मभद्राः ॥ ४६ ॥ सिंहे जयाषट्कशनिश्च मूलं पूर्णा शनिर्द्दिक्श्रवणस्त्रियाञ्च ॥ गुरुस्त्रिरिक्ता शतभे तुले च नन्दालिके रेवतिसप्तशुक्राः ॥ ४७ ॥ चापे चतुः शुक्रजयाभरण्यो मृगोऽष्टमे रोहिणिभौमरिक्ताः ॥ कुम्भे जयार्द्रागुरुरुद्रघाता झषे भृगुश्चान्त्यभुजंगपूर्णाः ॥ ४८ ॥ ❋ अथ घातचन्द्रादौविहितकर्म्माण्याह ❋ विवाहचूडाव्रतबन्धयज्ञे पट्टाभिषेके च तथैव राज्ञः ॥ सीमन्तकार्य्ये खलु जातके च नो घातचन्द्राद्यमिदं विचिन्त्यम् ॥ ४९ ॥ ❋ अथ वारविचारः ❋ जीवः शुक्रो बुधश्चन्द्रःशुभाख्यो वासरः स्मृतः ॥ शनैश्चरो महीसूनुः सूर्य्यः पापाभिधोभवेत् ॥ ५० ॥ भास्कराङ्गारकौ रक्तौ शुक्लौ शुक्रनिशाकरौ ॥ पीतौ बुधगुरू ज्ञेयौ कृष्णौ राहुशनैश्चरौ ॥ ५१ ॥ अर्कः शुक्रः कुजो राहुः शनि

---

[ १ ] अथैषां स्थिरचरादिसंज्ञामाह श्रीपतिसमुच्चये ; "रविः स्थिरश्शीतकरश्चरश्च महीज उग्रश्शशिजश्च मिश्रः । लघुः सुरेज्योभृगुजोमृदुश्चशनिश्च तीक्ष्णः कथितोमुनीन्द्रैरि" ति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्चन्द्रो बुधो गुरुः ॥ प्रागादिककुभां नाथाः क्रमात्सू-
र्य्यादयो ग्रहाः ॥ ५२ ॥ ❋ अथ प्रहरार्द्धविचारः ❋
रवौ वर्ज्याश्चतुष्पंच सोमे सप्तद्वयन्तथा ॥ कुजे षष्ठ-
द्वयञ्चैव बुधे पञ्चतृतीयकम् ॥ ५३ ॥ गुरौ सप्ता-
ष्टकंचैव शुक्रे वेदतृतीयकौ ॥ शनावाद्यन्तषष्ठंच प्र-
हरार्द्धं विगर्हितम्[1] ॥ ५४ ॥ ❋ अथ दिनर्क्षकुयोग-
माह ❋ रवौ मघानुराधा च सोमे वैश्वेद्विदैवते[2] ॥
भौमे शतभिषार्द्रा च बुधे मूलाश्विनी तथा ॥५५॥
भृगो वह्निः सुराचार्य्ये शुके श्लेषा च रोहिणी ॥
शनौ हस्तश्च पूषा[3] च सर्वकार्येषु निन्दिताः ॥ ५६॥
❋ अथ समयाऽशुद्धिः ❋ चौलोद्वाहजपव्रतोपनय-
नाग्न्याधाननीराशयान्देवस्थापनकर्णवेधनमहादाना-
दिविद्यामखान् ॥ यात्रापूर्वसुरेक्षणान गृहवृषोत्सर्गा-
भिषेकाश्रमानस्तेभार्गवजीवयोर्न्न तनुयान्मासि क्षये
चाधिके ॥ ५७ ॥ वक्रे चैवातिचारे च देवतानां गु-
रोरपि ॥ त्याज्यानि शुभकर्म्माणि सकलानि मनीषि-
भिः ॥ ५८ ॥ गुरोर्भृगोः शिशुत्वे च वृद्धत्वे ग्रहसंगरे॥
अतिप्रक्षीणचन्द्रे च नकुर्य्यान्मंगलक्रियाम् ॥ ५९ ॥

---

(१) अत्र रात्रिप्रहरार्धविचारोग्रन्थान्तरे केषाञ्चिन्मतेऽस्तीत्युपेक्षि-
तोऽत्र । स यथा "रवौरसाब्धीहिमगौद्वयाब्धीद्वयंमहीजेविधुजे शरा-
गौ । गुरौरसाष्टौभृगुजेतृतीयंशनौरसाद्यन्तमितिक्षापायाम् " इति ॥

(२) वैश्वमुत्तराषाढा, द्विदैवतं विशाखाख्यं चेति ॥ (३) रेवती ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गुर्वादित्ये गुरौ सिंहे मकरे च तथैव च ॥ याम्यायने हरौ सुप्ते सर्वकर्माणि वर्ज्जयेत् ॥ ६० ॥ * अथ मन्वादियुगादिविचारः ॥ * मन्वादयो युगाद्याश्च रविसंक्रान्तयोऽपि च ॥ मासान्ताश्चपरित्याज्या व्रतादिशुभकर्म्मसु ॥ ६१ ॥ अश्वयुक्शुक्लनवमी द्वादशी कार्तिके तथा ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ ६२ ॥ फाल्गुनस्याप्यमावास्या पौषस्यैकादशी सिता ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ ६३॥ पुनर्भा-द्रेऽष्टमी कृष्णा तथाऽऽषाढी च पूर्णिमा ॥ कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी तथा ॥ ६४ ॥ एते मन्वादयः प्रोक्ता गर्गादिमुनिभिः पुरा ॥ युगादिकं च यत्प्रोक्तं तद्वदामि पृथक् पृथक् ॥६५॥ वैशाखशुक्लपक्षे च तृतीयायां कृतं युगम् ॥ कार्त्तिके शुक्लपक्षे तु त्रेता च नवमेऽहनि ॥६६॥ द्वापरंच त्रयोदश्यां कृष्णे भाद्रपदस्य च ॥ माघस्य पूर्णिमास्यांतु घोरं कलियुगन्तथा ॥६७॥ * अथोत्पातविचारः ॥ * दिशान्दाहे समुत्पन्ने ग्रहणे चन्द्रसूर्य्ययोः ॥ धूलिपाते च निर्घाते धूमपाते तथैव च ॥६८॥ द्विसूर्य्ये

---

१ चान्मासाद्याः । "रविदग्धंदिनत्रय" मितिवचनात् । अत्राहुः । "विषुवायनेषुपरपूर्वमध्यमान्दिवसांस्त्यजेदितरसंक्रमेषु च । घटिकास्तु षोडश शुभक्रियाविधौ परतोऽपि पूर्वमपि सन्त्यजेद्बुधः" ॥ इति ॥ २ वाय्वभिहतवायुमपतनजन्यशब्दविशेषे ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वा त्रिसूर्यैर्वा छिद्रेणापि च संयुते ॥ रात्रौ धनुषि शाक्रे च कर्द्दमस्यापि वर्षणे ॥ ६९ ॥ केतूद्गमः शोणितवर्षणंच धराप्रकम्पः करकानिपातः ॥ उल्काशनीनां पतनं यदा स्यात्तदा निषिद्धानि दिनानि सप्त ॥ ७० ॥ इति संक्षेपतः प्रोक्तमुपदेशाभिधं मया ॥ श्रेष्ठप्रकरणं यस्मादनेन ज्ञानमुत्तमम् ॥ ७१ ॥ ❀ इति मैथिल श्रीभानुनाथदैवज्ञविरचिते व्यवहाररत्ने उपदेशप्रकरणम् ॥ ❀ ॥ १ ॥ सर्वाश्रमाणान्नितराम्बलीयान् गृहाश्रमः प्राङ्मुनिभिः प्रदिष्टः ॥ तस्मादहं वच्मि गृहक्रियायां विधानमादौ व्यवहारयोग्यम् ॥ १ ॥ ❀ अथ वास्तुभूमिज्ञानमाह ❀ ॥ पूर्वोत्तरप्लवा भूमिः सुप्रसन्ना समापि च ॥ ईशोप्लवा निरुच्छिष्टा प्रशस्ता वासकर्म्मणि ॥ २ ॥ दक्षिणापरनीचाभूःसोषरा विषमापि वा ॥ वृक्षच्छायासमायुक्ता वर्ज्जनीया प्रयत्नतः ॥ ३ ॥ उक्तादन्यस्वरूपा तु निषिद्धविहितेतरा ॥ तस्यामपि भवेच्छान्त्याथवा देवद्विजाज्ञया ॥४॥ श्वेता च ब्राह्मणीभूमिः क्षत्रियारुणविग्रहा ॥ वैश्या पीततरा ख्याता कृष्णा शूद्राभिधीयते ॥ ५ ॥ ब्राह्मणी ब्राह्मणस्योक्ता क्षत्रिया क्षत्रियस्य च ॥ वैश्या वैश्यस्य निर्दिष्टा शूद्रा शूद्रस्य शस्यते ॥ ६ ॥ हस्तमात्रं खने-

१ "सूर्येदृष्टे,, इति शेषः । २ पेशाग्न्यांनिम्ना । ३ वन्येरत्नुपिवा । ४ नैर्ऋत्यांनिम्ना ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्खातं जलेनैव प्रपूरयेत् ॥ पूरिते वास्तुकर्त्ता च गच्छे-
त्पदशतं पुनः ॥ ७ ॥ समागत्याम्भसो वृद्धिं दृष्ट्वा वृ-
द्धिरनुत्तमा ॥ समेऽपिस्यान्महावृद्धिः क्षये क्षयमथा-
दिशेत् ॥ ८ ॥ * अथ राशीनां वासस्थानमाह *
कीटो[1] मीनोऽङ्गना[2] कर्कः कार्मुको[3] युक्[4]क्रियो[5] घटः[6] ॥
आवासेपूर्वतस्त्योज्याः शेषाः सर्वत्र शोभनाः ॥ ९ ॥
* अथ ग्रामवासे धारोपधारज्ञानमाह * अक्षरं द्विगु-
णं कृत्वा मात्रां कृत्वा चतुर्गुणां ॥ ग्रामस्य च तथा
पुंसो गणयेन्नामवर्णकम् ॥ १० ॥ सप्तभिश्च हरेद्भागं
शेषाद्वाच्यं फलाफलम् ॥ एकशेषेण शून्येन चतुर्भिश्चै-
वकन्दलम्[7] ॥ ११ ॥ षट्कं चापि द्वयं यत्र प्राप्यते बहु-
शो धनम् ॥ पंचकेन त्रयेणापि न लाभो न च वाक्ष-
तिः ॥ १२ ॥ * अथ नामराशितो ग्रामराशिविचारः *
नामभाद्ग्रामराशिःस्याद्व्यङ्कपञ्चेशदिङ्मितः ॥ तदैवमु-
निभिः प्रोक्तो निवासः शुभदायकः ॥ १३ ॥ * अथ
ग्रामचक्रविचारः * मस्तके पंचलाभाय मुखे त्रीणि
धनक्षयः ॥ कुक्षौ पञ्च धनं धान्यं षट्पादेस्त्री दरिद्रता
॥ १४ ॥ कण्ठे चैकं प्राणहानिर्न्नाभौ चत्वारि संपदः।
गुह्ये चैकं भयं पीड़ा हस्ते चैकन्तु कन्दलम् ॥ १५ ॥
एकं वामकरे शोको ग्रामचक्रन्नराकृति ॥ गणयेन्नाम

---

(१) वृश्चिकः। (२) कन्या। (३) धनुः। (४) मिथु-
नः। (५) मेषः। (६) कुंभः। (७) विनाशः।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ऋक्षान्तं ग्रामनक्षत्रतः सदा ॥१६॥ * अथ ग्रामनाम्नोर्वर्गविचारः * स्ववर्गं द्विगुणी कृत्य परवर्गेण योजयेत् ॥ अष्टभिश्च हरेद्भागं योऽधिकः स ऋणी भवेत् ॥१७॥ * अथ वर्गविचारः * अवर्गात्ताक्ष्यं-मार्ज्जारसिंहश्वासर्प्पमूषकाः ॥ गजो मृगश्च वर्गेशाः स्ववर्गात्पञ्चमो रिपुः ॥१८॥ स्वके स्वके च ते स्थाने सर्वे कल्याणदायकाः ॥ अन्यद्धिताहितं तेषां लौकिकव्यहारतः ॥१९॥ * अथैषां शरानाह * वसु भूतरसा वेदो मुनिचन्द्रत्रियुग्मकम् ॥ पूर्वादिक्रमतो ज्ञेयं वर्गोपरि दिगष्टके ॥२०॥ * अथवास्तौ कस्यान्दिशि वस्तव्यं तदाह * ग्रामस्यापि दिशः पुंसोवर्गाङ्कं वर्त्तुलीकृतं ॥ वसुना भागमाहृत्य सूर्य्याद्यं दिक्फलं वदेत ॥२१॥ सौम्यादशा प्रशस्ता स्यादसौम्या गर्हिता सदा ॥ एवं दशाविचारः स्यान्मध्यमागीष्पतेःस्मृता ॥२२॥ * अथ गृहारम्भे मासविचारः * वैशाखे श्रावणे मार्गे फाल्गुने च विशेषितः॥ गृहारम्भः प्रशस्तः स्यान्मध्यमः कार्त्तिके शुचौ ॥२३॥ परिशेषास्तु ये मासा ये च न्यूनाधिमासकाः ॥ तेसर्वे वर्ज्जनीयाः स्युर्गृहारम्भे विचक्षणैः ॥२४॥ निषिद्धेपि हि मासादौ सानुकूलेशुभे दिने ॥ तृणवस्त्रगृहारम्भे

---

१ अ-क-च-ट-त-प-य-शा अष्टौवर्गाः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मासदोषो न विद्यते ॥ २५ ॥ ❀ अथ पक्षशुद्धिः ❀ शुक्लपक्षे भवेत्सौख्यं कृष्णेतस्कतोभयम् ॥ इति सामान्यतः प्रोक्ता पक्षशुद्धिर्म्मनीषिभिः ॥ २६ ॥ वस्तुतः पंचमीं यावत्कृष्णपक्षस्य धीमता ॥ गृहारम्भः प्रकर्त्तव्यस्तृणदारुमृदादिभिः ॥ २७ ॥ ❀ अथ तिथिशुद्धिः ❀ पूर्णायां प्राङ्मुखंशस्तं नन्दायां दक्षिणाननम् ॥ पश्चिमास्यन्तु भद्रायां जयायामुत्तराननम् ॥ २८ ॥ पूर्णिमातोऽष्टमीं यावत् पूर्वास्यं वर्ज्जयेद्गृहम् ॥ उत्तरास्यं नकुर्वीत नवम्यादिचतुर्द्दशीम् ॥ २९ ॥ अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत् ॥ नवमीतो न याम्यास्यं यावच्छुक्लचतुर्दशीम् ॥ ३० ॥ शुक्लप्रतिपदंरिक्तां मासान्ता च दिनत्रयम् ॥ अवमाद्यं गृहारम्भे यत्नतः परिवर्ज्जयेत् ॥ ३१ ॥ ❀ ॥ अथनक्षत्रविचारः ॥ ❀ मूलाजपादसंयुक्ते मृदुक्षिप्रचरध्रुवे ॥ वास्तुकर्म्मशुभं प्रोक्तं गृहारम्भस्तथैवच ॥ ३२ ॥ छेदनं तृणकाष्ठानां संग्रहञ्च विशेषतः ॥ भूतिकामो न कुर्वीत षट्केन श्रवणादिना ॥ ३३ ॥ ❀ अथ गृहारम्भे वारविचारः ❀ रवावग्निः कुजे नाशः शशिन्यैस्वं शनौभयम् ॥ सुरेज्ये भार्गवे सौम्ये गृहारम्भोमनोरमः ॥ ३४ ॥

---

१ पूर्वभाद्रम् । २ धनाभावः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

❀ अथ योगशुद्धिः ❀ वज्रव्याघातयोगेषु व्यतीपातेऽतिगण्डके ॥ विष्कुम्भगण्डयोगे च गृहारम्भन्नकारयेत् ॥३५॥ ❀ अथ संमुखराहुविचारः ❀ त्रिभिस्त्रिभिश्च मार्गाद्यैराहुस्तिष्ठति पूर्वतः॥विपरीतक्रमेणैव द्वारं संमुखतस्त्यजेत् ॥३६॥ अन्यवेस्मस्थितं दारुनैवान्यस्मिन् प्रयोजयेत् ॥ न तत्र वसते कर्त्ता वसन्नपि न जीवति ॥३७॥ नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते ॥ न जीर्णे नूतनं श्रेष्ठं नो जीर्णं नूतने तथा ॥३८॥ ❀ अथ द्वारनिर्माणविचार ❀ द्वारस्य संमुखे द्वारंद्वारं द्वारोपरिस्थितम् ॥ नैवकुर्य्याद्धनाकांक्षी पुत्रकांक्षी विशेषतः ॥३९॥ ❀ अथ गृहेशिल्पादिक्रियाविचारः ❀ ध्रुवे मैत्रे चरे क्षिप्रे जीवे सौम्ये खेलग्नगे ॥ चन्द्रेगुरुस्ववर्गस्थे शिल्पारम्भः प्रशस्यते ॥४१॥ उलूककाकगृद्ध्राश्च व्याघ्रसिंहवराहकाः ॥ पिशाचा राक्षसाः क्रूराः संग्रामं रोदनं तथा ॥ ४१ ॥ इन्द्रजालवदन्यानि प्रपंचचरितानि च ॥ भीषणानि च सर्वाणि गृहचित्रे विवर्ज्जयेत् ॥ ४२ ॥ ❀ अथ गृहकरणार्थवास्तुविचारः ❀ यदुक्तं भवनारम्भे शुभं वाप्यशुभं बुधैः ॥ तदेव तिथिमासाद्यं विज्ञेयं वास्तुकर्म्मणि ॥४३॥ विशेषाच्छ्रवणाषट्कं शनिवासरमेव च ॥ गृहीत्वा पूजयेद्भूमिं

---

१ द्वारोपरिद्वारं द्विभूमिकेमागादेसम्भवति । २ खं दशमस्थानम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शकुनं च विचारयेत् ॥४४॥ ❀ अथ लग्नशुद्धिः ❀ मेषे भूयो भवेद्यात्रा कर्कटे नाशमाप्नुयात् ॥ तुलोदये भवेद्व्याधिर्द्धान्यनाशो मृगोदये ॥ ४५ ॥ अन्ये येराशयश्चाष्टौ वास्तुकार्य्ये शुभावहाः ॥ तेषां नवांशकाद्यास्तु भागास्तत्तुल्यपाकदाः[1] ॥ ४६ ॥ ❀ अथ सामान्यतो ग्रह शुद्धिविचारः ❀ त्रिषड्दशायसंस्थाश्च सर्वे खेटाः शुभावहाः । त्रिकोणेऽप्यथवा केन्द्रे शुभा एव शुभप्रदाः ॥४७॥ ❀ अथ गृहप्रवेशविचारः ❀ वास्तौ वापि गृहारम्भे यदुक्तञ्च शुभाशुभम् ॥ तदेवात्रापि विज्ञेयं प्रवेशे नव्यवेश्मनः ॥ ४८ ॥ किञ्चित् किञ्चिद्विशेषो यः प्रवेशे नवसद्मनः ॥ वक्ष्यमाणविधानेन विज्ञेयः शुभ मिच्छता ॥४९॥ ❀ अथ मासविचारः ❀ माघफाल्गुनवैशाखज्यैष्ठमासेषु शोभनः ॥ प्रवेशो मध्यमो ज्ञेयो मार्गकार्त्तिकमासयोः ॥ ५० ॥ श्रावणेपि च के चित्तु प्रवदन्ति मनीषिणः ॥ सप्तम्यादिसकाराणां सप्तानां[2] कारणे न च ॥ ५१ ❀ अथतिथिविचारः ❀ अमावास्या च षष्ठी च रिक्ता शुक्लस्य पक्षतिः[3] । अष्टमी संमुखः शुक्रो वर्ज्जनीयाः प्रवेशके ॥५२॥ ❀ अथ नक्षत्रविचारः ❀ कृत्तिकाद्यास्तु पूर्वादौ सप्त सप्तोदिताः क्रमात् ॥ यद्दिश्यं यच्च नक्षत्रं

---

१ फल । २ श्रावणशुक्लसप्तमीशनिशतभिषाशुभयोगसिंहलग्नानाम् ॥
३ पक्षमूलं, प्रतिपत् ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तत्र तस्य प्रवेशनम् ॥५३॥ ❀ अथ वामरविविचारः ❀ रन्ध्रात्पुत्राद्धनादायात्पञ्चस्वर्के स्थिते क्रमात् ॥ पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः ॥५४॥ ❀ अथ स्त्रीणां चुह्लिकोपरिभाण्डस्थापन स्नानदिवस माह ❀ चुह्लिकोपरि मृद्भाण्डं स्थापयेन्नैव कामिनी ॥ भृगुचन्द्रमसोर्वारे स्नायान्नैव च वारुणे ॥५५॥ ❀ अथ प्रवेशविधानमाह ❀ पुष्पाक्षतैरमरदैववविदिष्टसाधूनभ्यर्च्य संभृतसिताम्बरसाधुवेषः ॥ पुण्याहशंखपटहध्वनितूर्यघोषैर्द्वारेण भूम्यधिपतिः प्रविशेत्सुवेश्म ॥ ५६ ॥ ❀ अथ गृहदेव्या स्थापनविधिः ❀ श्रीप्रदं सर्वगीर्वाणस्थापनञ्चोत्तरायणे ॥ विचैत्रेष्वेव मासेषु माघादिषु च पंचसु ॥ ५७ ॥ वलक्षपक्षः शुभदः समस्तः सदैव तत्राद्यदिनं विहाय ॥ अन्त्यं त्रिभागं परिहृत्य कृष्णपक्षोऽपि शस्तः शुभवासरश्च ॥ ५८ ॥ याम्यायनेऽपि देवीनां स्थापनं नवरात्रिषु ॥ प्रशस्तं कार्त्तिके विष्णोर्भाद्रे कलशजन्मनः ॥ ५९ ॥ रिक्तावमकुयोगाद्यंवर्ज्जयित्वाप्रयत्नतः ॥ सुराणां स्थापनं कुर्याद्योगापन्ने शनावपि ॥६०॥ हस्तत्रये मित्रहरित्रये च पौ-

---

१ अत्रविशेषोवास्तुप्रदीपे "अधोमुखैर्भैर्विदधीतखातं शिलान्यसेदूर्ध्वमुखेचऋक्षे। तिर्यङ्मुखैर्द्वारकपाटजातं गृहप्रवेशोमृदुभिर्ध्रुवैश्च" १ तथा "अधोमुखैश्चनक्षत्रैः कर्त्तव्यंभूमिशोधनम्। मृदुध्रुवैःशुभंकुड्यमित्युक्तं विश्वकर्मणा" ॥ पञ्चकेषुचधिष्ण्येषुस्तम्भमुत्थापयेन्नहि। क्षेत्रसूत्रशिलान्यासप्राकारादिसमारभेत्।

२ नवमात्। ३ शतभिषायाम् ४ उपलक्षणमेतत्। ५ शुक्लपक्षः।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ष्णद्वयादित्यसुरेज्यभेषु ॥ तिस्रोत्तराधातृशशाङ्कधिष्ण्ये सर्वामरस्थापनमुत्तमं स्यात् ॥६१॥ स्थाप्यो हरो दिनकरो मिथुने महेशो नारायणश्च युवतौ घटभे विधातां[2] ॥ देव्यो द्विमूर्तिभवनेषु निवेशनीयाश्छुद्राश्चरे स्थिर गृहे निखिलाश्च देवाः ॥ ६२ ॥ ❋ अथ गृहसमीपे शुभाशुभवृक्षकथनम् ❋ यत्र तत्र स्थिता वृक्षा विल्वदाडिमकेशरा[3]ः । पनसो[4] नारिकेलश्च शुभं कुर्वन्ति नित्यशः ॥ ६३ ॥ जम्बीरश्च रसाल[5]श्च रम्भा[6]शेफा[7]लिका तथा ॥ जवा[8]शोकशिरीषाश्च मल्लिका[9]द्याःशुभप्रदाः ॥६४॥ मालतीञ्चैव चम्पाश्च केतकीं कुन्दमेव च ॥ मुनि[10]वृक्षं ब्रह्म[11]वृक्षं वर्जयेद्गृहसन्निधौ ॥६५॥ तिन्तिळीको वटः प्लक्षः पिप्पलश्च स कोटरः ॥ क्षीरी च कंटकी चैव निषिद्धास्ते महीरुहाः ॥ ६६ ॥ षर्ज्जूरी दाडिमी रम्भा कर्कन्धू[12] बीजपूरिका[13] ॥ उत्पद्य[14]न्ते गृहे यत्र तन्नि-

---

१ अतूसन्धिश्छन्दोऽनुरोधेन । अग्न्युत्तरेतिपाठःसुगमः । २ ब्रह्मा, अस्यस्थापनं सन्ततिमता गृहिणानकार्यम् यथोक्तंस्कांदेनागरखण्डे (१९२अ.)अद्यप्रभृतियःपूजांमंत्रपूर्वांकरिष्यति । तवमर्त्योधरापृष्ठेयथान्येषांदिवौकसाम् । भविष्यतिचतद्वंशोदरिद्रोदुःखसंयुतः । ब्राह्मणःक्षत्रियोवापिवैश्यःशूद्रोऽपिचालये ॥ इतिसरस्वतीशापोब्रह्माणंप्रति । ३केसरोवकुलः। नागकेसरोवा ।४कंटकिफलःकटह-र(ल)इतिप्रसिद्धः। ५आम्रः।'आम्रश्चतोरसाऽलोसा,वित्यमरः । ६कदलीइयं पूर्वेशान्योर्गृहान्निषिद्धा । ७ नेवारीति प्रसिद्धा । ८ ओंड्रपुष्पम् ॥ ९ वेलीतिप्रसिद्धा ॥ १० अगस्तिवृक्षम् ॥ ११ गम्भारीतिप्रसिद्धम । १२ वदरी फलम् ॥ १३ विजौरा (नेवो) प्रसिद्धा ॥ १४ एतायत्रगृहे स्वयमुत्पद्यन्ते तद्गृहंमूलतः निकृन्तन्ति नाशयंति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कृन्तंति मूलतः ॥ ६७ ॥ वृक्षप्रासादिनीच्छाया सञ्छन्नं यदि मंदिरम् ॥ अचिरेणैव कालेन उद्वासो[1] जायते ध्रुवम ॥ ६८ ॥ यामाद्दूर्ध्वन्तु या छाया वृक्षप्रासादसम्भवा ॥ वर्जयेत्तां प्रयत्नेन यावद्वै प्रहरद्वयम् ॥ ६९ ॥ प्रथमान्तयामवर्ज्जं द्वित्रिप्रहरसम्भवा ॥ छायावृक्षध्वजादीनां सदा दुःखप्रदायिनी ॥ ७

❀ अथ वृक्षरोपणदिवसमाह ❀ शुक्लपक्षे तिथौ शस्तेशुक्रे चन्द्रे गुरावपि ॥ तरूणां रोपणं शस्तं ध्रुवक्षिप्रमृदूडुभिः ॥ ७१ ॥ शीर्म्यन्तास्तिथयः कुजार्कशनयो वाराश्च षष्ठीयुता मासः प्रौष्ठपदस्त्रिविक्रममुखं नक्षत्रषट्कं तथा ॥ त्यक्त्वै तान् वृष सिंहवृश्चिकघटेष्वङ्गेषु[3] भद्रां विना गर्गाद्याःकदलीक्षुरोपणविधिंशस्तं जगुः सर्वदा ॥ ७२ ॥ ❀ इति मैथिल श्रीभानुनाथदैवज्ञविरचिते व्यवहाररत्ने गृहारम्भादिप्रकरणम् ❀ ॥२॥

विनाहलप्रवाहाद्यैर्न्ननिर्वाहः कलौ युगे ॥ चतुर्णामपिवर्णानामतस्तत्प्रथमं ब्रुवे ॥ १ ॥ ❀ अथ हलप्रवाह–बीजवपन–सस्यरोपण–प्रथमसस्यछेदनेषु तिथिशुद्धिमाह ❀ सप्तम्येकादशीचैव[2] पञ्चमी दशमी तथा ॥ त्रयोदशी तृतीया च प्रशस्ता हलकर्म्मणि ॥ २ ॥ मृदुध्रुवक्षिप्रचरेषु मूलमघाविशाखासहितेषु

---

१ वासोच्छेदः । २ एकादशी पञ्चम्याद्याः । ३ लग्नेषु ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भेषु ॥ हलप्रवाहं प्रथमं विदध्यान्नीरोगमुष्[1]कान्वित-
सौरभेयैः ॥ ३ ॥ विष्कुम्भवज्रव्यतिपातगण्डातिगण्ड-
मन्दारदिनं[2] विहाय ॥ सम्पूज्यदूर्वाक्षतगंधपुष्पैर्हलं वि-
दध्यात्कृषिकर्म्मकर्त्ता ॥ ४ ॥ हलप्रवाहवद्बीजवप-
नस्य विधिः स्मृतः ॥ रोपणे सर्वसस्यानां कर्त्तने
प्रथमेऽपिच ॥५॥ ❋ अथ नवान्नभक्षणविचारः ❋
वृश्चिकेपूर्वभागेतु माघे वापि च फाल्गुने ॥ स त्तिथौ
शुक्लपक्षे च पंचम्यन्ते[3] सितेतरे ॥ ६ ॥ मृदुक्षिप्रचर-
र्क्षेषु सत्तनौ[4] सत्क्षणेषुच ॥ हुत्वावह्नौविधानेन नवा-
न्नं भक्षयेत्सुधीः ॥ ७ ॥ ❋ अथान्ननिषेधविचारः ❋
नवान्नं[5] नव नंदायां न प्रसुप्ते जनार्द्दने ॥ नापराह्णे
न चापेर्के तुलार्के न कदाचन ॥ ८ ॥ न चैत्रे
न त्रयोदश्यां न द्विदैवस्थिते रवौ ॥ न कुजार्कि-
सिते[6] वारे न तारासु त्रिजन्मसु ॥ ९ ॥ ❋ अथ
नूतनताम्बूलफलभक्षणविचारः ❋ पुष्योत्तरादितिदि-
वाकरवाजिपौष्णमूलानुराधवसुवासववैष्णवेषु ॥ वारे-
षु सौरिधरणीसुतवारवर्ज्यं[8] ताम्बूलनूतनफलाद्यशनं
शुभाय ॥ १० ॥ ❋ अथ धान्यादिमर्द्दनस्थानवि-

१ मुष्कोऽण्डकोशस्तेनान्वितैर्वृषैः । २ मन्दः शनिः आरः कुजः ॥
३ कृष्णपक्षे पञ्चमीं यावत् । ४ शुभे लग्ने । ५ उत्तराषा-
ढासु । ६ मंगलशनिशुक्रे । ७ अनुगताराधा—विशाखाय-
स्मिन्मेवदनुराधन्तेनद्वन्द्वेसाधुः । ८ शनिमंगलौविहाय ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

चारः ❋ प्रसन्नभूमौ पुरसन्निधाने प्रोत्तुङ्गदेशेषु खलं विदध्यात् ॥ बन्ध्यप्रदेशे[2] पथि चैत्र निम्ने भीरुप्रदेशे खलको[3] न कार्य्यः ॥ ११ ॥ ❋ अथ मेधि (ढि)स्थापनविचारः ❋ वटोदुम्बरनीपानां[4] शाखोट[5]व-दरस्य च ॥ शाल्मलेर्म्मुशलेनैव मेधिं(ढिं)कुर्य्याद्विच-क्षणः ॥ १२ ॥ कपित्थविल्ववंशानां न च मेधिः(ढिः) कदाचन ॥ न पौषे न च रिक्तायां न कुजार्किदिने तथा ॥१३॥ मृदुक्षिप्रचरर्क्षेषु खाते द्रव्यं नियुज्य च । संपूज्य धान्यवद्धाग्रां मेढिं संस्थापयेद्बुधः ॥ १४ ॥ ❋ अथ कणमर्दनार्थदिवसमाह ❋ भाग्यार्य्यमश्रुतौ मूले धातृमैत्रमघासु च ॥ पौष्णेन्द्रर्क्षे शुभाहे च धान्यानां मर्द्दनं शुभम् ॥ १५ ॥ ❋ अथ बीज-रक्षणदिवसमाह ❋ रोहिणी रेवती मूलं स्वाती ह-स्तो मृग स्तथा ॥ आषाढोत्तरयुक्ता[6] च तथा भा-द्रपदा मघा ॥ १६ ॥ सस्यादिसर्वधान्यानां शुभे-वारे स्थिरोदये[7] ॥ गर्गादिमुनिभिः प्रोक्ता प्रशस्ता बीजबन्धने ॥ १७ ॥ ❋ अथ गृहादौ धान्यादि-स्थापनविचारः ❋ रोहिण्युत्तरपुष्येषु भरणीशक्रनेर्ऋ-ते ॥ पौष्णार्क्काश्विविशाखासु हरिमित्रपुनर्वसौ १८

---

१ ऊषरे । २ भयस्थाने । ३ स्वार्थेऽत्कः । ४ नीपः कदम्बः । ५. सा (सि) होढ इति प्रसिद्धः । ६ उत्तरयुक्ता । ७ स्थिरलग्ने ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

चित्रावसुमघायाञ्च जीवार्केन्दुभृगोर्दिने ॥ तथा तिथावरिक्तायां सस्यानां स्थापनं हितम् ॥ १९ ॥ ❋ अथ गृहाद्धान्यनिष्काशनविचारः ❋ उत्तराम्बुपविशाखवासवे चन्द्रभौमगुरुशुक्रवासरे ॥ गेहतो बहुतराय वृद्धये धान्यनिष्क्रमणमाह पण्डितः ॥ २० ॥ ❋अथ वृद्ध्यर्थंधान्यादिप्रक्षेपदिवसमाह❋ श्रवणात्रयंविशखाध्रुवपूर्वपुनर्वसूनि ऋक्षाणि ॥ पुष्याश्विन्यौ ज्येष्ठा धनधान्यविवृद्धये कथिताः ॥ २१ ॥ ❋ अथ धान्यादिमूल्यज्ञानमाह ❋ रौद्रादित्याम्यानिलवारुणेन्द्राण्याहुर्जघन्यानि तथा वृहन्ति ॥ ध्रुवद्विदैवादिति भानि नूनं समानिशेषाणि पुनर्म्मुनीन्द्राः ॥ २२ ॥ जघन्ये यदि संक्रान्ति र्ज्ञेयाऽन्नस्य महार्घता ॥ वृहत्संज्ञे समर्घत्वं समत्वं समसंज्ञके ॥ २३ ॥ ❋ अथ रव्यादिवारे संक्रमणफलमाह ❋ सूर्य्यारशनिवारेषु यदा संक्रमते रविः ॥ तदा क्रमाद्भयं विद्याद्राजपावकतस्करैः ॥ २४ ॥ सुभिक्षं क्षेममारोग्यं वारे च बुधसोमयोः ॥ नृपाः पीडन्ति पूर्वाह्णे मध्याह्ने तु द्विजोत्तमाः । अपराह्णे तु वैश्याश्च शूद्राश्चास्तमिते

---

१ संसम्यक् अर्घोमूल्यंयस्य तस्यभावस्तत्त्वंशस्तत्वमिवियावत् ॥

२ आरःकुजः । ३ अनित्यण्यन्नाश्चुरादयइतिणिजभावेरूपम । कर्मणिलट् । यगात्मनेपदाभावश्छन्दोऽनुरोधा 'द्बहुलंछन्दसी'तिपाणिनिस्मरणात् ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

रवौ ॥२६॥ पिशाचाद्याः प्रदोषेषु अर्द्धरात्रे तु राक्षसाः । रात्रेस्तृतीयभागेषु पीड्यंते नटनर्त्तकाः ॥ २७ ॥ उषःकाले तु संक्रान्तौ हताः पाखण्डकारकाः[1] ॥ हन्ति प्रव्राजितान्[2] सर्वान् संध्याकाले न संशयः २८

**॥ अथ पुण्यकालव्यवस्था ॥** अर्वाक्षोड़शविज्ञेया नाडयः पश्चाच्चषोड़श ॥ कालः पुण्योऽर्कसंक्रान्तौ द्धद्भिः परिकीर्त्तितः[3] ॥ २९ ॥ रजन्याः पूर्वभागे तु यदा संक्रमते रविः ॥ तदा पूर्वदिनस्यैव पराह्णे पुण्यनाड़िकाः ॥ ३० ॥ परभागे यदा रात्रे र्भानोः संक्रमणं भवेत् ॥ तदा परदिनस्यादौ पुण्याख्या नाड़िकाः स्मृताः ॥ ३१ ॥ पूर्णे निशीथकाले तु सं-

---

1 वञ्चकाः    2 संन्यासिनः ॥

3 एतच्च जावालशातातपीयं वचनमिहोद्धृतम् । अत्र मामकाः संग्रहश्लोकाः । सायंसन्ध्यात्रिघटिका तस्यांमकरसंक्रमे । पूर्वेह्णि पुण्यं मध्याह्नादूर्ध्वमेकातिथिर्यदि॥ दिवारात्र्योर्भवेन्नातसन्देहःपूर्व सम्मतः । सन्ध्यायाःपरतोरात्रौ संक्रमेचोत्तरेऽहनि ॥ पुण्यमुक्तं यथाशास्त्रं निबन्धेषुचसूरिभिः । गौड़ैकदेशिभिः सोऽर्थोऽनुमतोवस्तुतस्तुहि ॥ अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरिक्रिया । ऊर्ध्वे संक्रमणे चोर्ध्वमुदयात्महरद्वयम् ॥ निशीथेऽपि तथैवाहुर्बुधाः केचिन्मनीषिणः । सिद्धान्तिनस्तूभयतोदिवसार्धपरं पुरः ॥ तत्रापि यदिपूर्वेह्णि संक्रमेचैकिकातिथिः । तदापूर्णार्धरात्रेऽपि तत्मत्वेनपरेऽहनि ॥ किन्तु पूर्वेह्णिमध्याह्नात्परमेवेतिनिर्णयः । नानागौड़निबन्धेषुसिद्धवत्कृतइत्यलम् ॥७॥ तदेतद्दर्पकृत्ये रुद्रधरीये द्वैतपरिशिष्टे च केशवमिश्रकृतेऽन्यत्र च स्फुटमुक्तं द्रष्टव्यम्॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्रान्ति र्यदि जायते ॥ तदा दिनद्वये पुण्यमिति प्राहु र्मुनीश्वराः ॥ ३२ ॥ कर्क्कटस्य मृगस्यापि विशेषार्थो ऽस्ति संक्रमे ॥ तन्नोक्तं विस्तृतित्रासाद्व्यवहारोऽपि कुण्ठितः ॥ ३३ ॥ ❋ अथ प्रथमहट्टावासचक्र-माह ❋ रविभाच्चन्द्रनक्षत्रैः फलं ज्ञेयं शुभाशुभम् ॥ हट्टयां चक्रमाख्यातं गर्गादिमुनिभाषितम् ॥ ३४ ॥ आसने च द्वयञ्चैव मुखे चैव द्वयं भवेत् ॥ आग्नेये चतुरोदद्यात्तथा चत्वारि नैर्ऋते ॥३५॥ ❋ अथ फल मस्य ❋ आसने सर्वसौख्यञ्च मुखे च भुवियातना ॥ आग्नेय्यामर्थनाशं च नेर्ऋत्याञ्च सुखप्रदम् ॥ ३७ ॥ प्रत्यङ्मुखे महत्सौख्यं वायुकोणे तथोद्वसम् ॥ ऐशान्यां सर्वहानिः स्यान्मध्यकोणे शुभप्रदम् ॥३८॥ कुंभलग्न-मपहाय साधुषु द्व्यंकर्म्मभवमूर्तिवर्त्तिषु ॥ अव्ययेषु शुभदायिषूद्गमं भार्गवे विपणिरिन्दुसंयुते ॥ ३९ ॥ ❋ अथ क्रयविक्रयविचारः ❋ यमाहिशक्राग्निहु-ताशपूर्वा नेष्टाः क्रये विक्रयणे तु शस्ताः ॥ पौष्णा-श्विचित्राशतविष्णुवाताः क्रये हिता विक्रयणे निषि-द्धाः ॥ ४० ॥ ❋ अथ द्रव्याणामृगदानप्रयोग-दिवसविचारः ❋ तीक्ष्णमिश्रध्रुवोग्रैर्य्यदद्रव्यं दत्तं

---

१ मकरस्य । तथा च स्मृतौ 'त्रिंशत्कर्कटके पूर्वमाकरेविंशतिःपरे' ति ।
२ अत्र दिशतीतिशेषः । ३ उद्वासनम् । पृथक्कृतिरितियावत् ।
४ द्वितीयादिस्थानेषु । ५ द्वादशभावातिरिक्तेषु ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निवेशितम् ॥ प्रयुक्तञ्च विनष्टञ्च विष्टयां[1]पाते च नाप्यते ॥ ४१ ॥ नकुजार्के न संक्रान्तौ न वृद्धौन करर्क्षके[2] ॥ ऋणं विपश्चिता[3] ग्राह्यं न देयं बुधवासरे ॥४२॥ स्वात्यादित्यद्विदैवेषु मृदुपुष्यश्रुतित्रये ॥ सुताष्टधर्म्मसंशुद्धे चरे कुर्य्याद्धनक्रियाम् ॥ ४३ ॥ ❀ अथ गवां क्रयविक्रयादिविचारः ❀ क्षिप्रे शाके धनिष्ठायां द्विदेवे वारुणेऽपि च ॥ अदित्यां पौष्णभे शस्तौ गवाञ्च क्रयविक्रयौ ॥ ४४ ॥ प्रजेशचित्रश्रवणोत्तरासु चतुर्द्दशीदर्शदिनाष्टमीषु ॥ गवान्न कुर्य्यात्क्रयविक्रयञ्चस्थानंप्रवेशं गमनं कथञ्चित् ॥ ४५ ॥ यदुक्तं गोक्रियाया ञ्च तिथिवासरभादिकम् ॥ तदेवाजमहिष्यादेः प्रक्रियायां[4] शुभाशुभम् ॥ ४६ ॥ ❀ अथ वाजिनां क्रयविक्रयादिदिवसमाह ❀ क्षिप्रान्त्यवसुचान्द्रेषु स्वात्यादित्यजलेषु च ॥ विरिक्तारदिने[5] प्रोक्तं वाजिकृत्यं मनीषिभिः ॥ ४७ ॥ तिष्याश्विधातृकरसौम्यमघानुराधापौष्णोत्तरादितिमरुत्त्रयवैष्णावेषु ॥ वागीशशुक्रशशिसौम्यदिने सुलग्ने रिक्तां विहाय निगदन्ति गजाख्यकार्यम्[6] ॥ ४८ ॥ ❀ अ-

---

१ भद्रायां. व्यतीपाते च । २ हस्ते ३ विदुषा

४ क्रयविक्रयरूपायाम् । ५ आरः कुजः

६ गजाख्यस्यपशोःकार्यंक्रयविक्रयादि ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

थाश्वादियानारोहणदिवसमाह ❋ जीवेन्दुसौम्या-र्कसिते च वारे पौष्णाश्विचित्रानिलवासुदेवे ॥ हस्तेऽम्बुपुष्ये श्रवसीन्दुशुद्धे आरोहणं वाजिरथेभ[1]का नाम् ॥४९॥ ❋ अथ गजदंतच्छेदन(सज्जना)दिवसमाह ❋ धिष्ण्येषु[2] वैष्णवाश्विनितिष्यधनादित्यहस्तचित्रासु ॥ सुतिथौ शुभवासरेषु च दंतच्छेदश्च दन्तिनामुक्तः ॥५०॥ भौमार्कजयोर्वारे दिवसपतौ गुरुगृहे हरौ सुप्ते ॥ पक्षे सिते निशायां द्विरदानां कल्पना[3] नेष्टा ।५१। ❋ अथ मंत्रग्रहणसमयमाह ❋ चैत्रे दुःखाय[4] दीक्षा स्याद्वैशाखे सर्वसिद्धिदा ॥ ज्यैष्ठे मृत्युप्रदा सा स्यादाषाढे बन्धुनाशिनी ॥ ५२ ॥ श्रावणे पुत्रदा नृणां नभस्ये दुःखदा स्मृता ॥ आश्विने सर्वसिद्ध्यै स्यात्कार्त्तिके ज्ञानसिद्धिदा ॥ ५३ ॥ शुभदा मार्गशीर्षे च पौषे ज्ञानविनाशिनी ॥ माघे मेधाविवृद्धिः स्यात्फाल्गुने विजयप्रदा ॥ ५४ ॥ कृष्णपक्षे न क-

१ इभोहस्ती

२ नक्षत्रेषु । "धिष्ण्यंस्थानेगृहेभेऽग्ना"वित्यमरः ॥

३ "कल्पनासज्जनासमे" इत्यमरः ।

४ "मन्त्रारम्भस्तुचैत्रेस्यात्समस्तपुरुषार्थद" इतित्वन्यत्र तदेतद्गोपालमंत्रविषयं, गौतम्ये उक्तत्वात् एवमाषाढे निषेधोऽपि श्रीविद्यातिरिक्तविषयस्तत्र "ज्यैष्ठे मृत्युप्रदाचैव आषाढे धनसंपद" इति योगिनीहृदये उक्तत्वात् ॥ ९ भाद्रे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ल्याणं वाञ्छितप्रतिबंधकृत् ॥ शुक्रे वाञ्छितसिद्धिः स्याद्द्रव्यलाभः शुभप्रदः ॥ ५५ ॥ द्वितीया च तृतीया च पञ्चमी सप्तमी तथा ॥ दशम्येकादशी चैव द्वादशी च तथैवच ॥ ५६ ॥ एता अति प्रशस्ताः स्युर्दीक्षाग्रहणकर्मणि ॥ षष्ठी च नवमी चैव तथाचान्याधमास्मृताः[१] ॥ ५७ ॥ ❋ अथ नक्षत्रशुद्धिः ❋ स्थिरर्क्षे मृगशीर्षे च तथा चित्रानुराधयोः ॥ पौष्णेच वसुभे चैव दीक्षाकर्म्मप्रशस्यते ॥५८॥ ❋ अथात्र-वारादिनियमः ❋ कुजार्कजौ परित्यज्य सुमूहर्त्ते शुभोदये ॥ ताराचन्द्रानुकूले च मन्त्रग्रहणमुच्यते॥५९॥ चन्द्रसूर्य्यग्रहे चैव सिद्धिक्षेत्रे सुरालये ॥ प्रोक्तमेतत्तु दीक्षायां सुधीभिर्नैव चिंतयेत् ॥६०॥ ❋ अथ मैत्रीकरण-दिवसमाह ❋ पुष्येंदुमित्रभाग्येषु द्वादश्यां शुभवासरे ॥ अष्टम्यां वा स्थिरे लग्ने मैत्रीकरणमुत्तमम् ॥ ६१ ॥

❋ इति मैथिल श्री भानुनाथदैवज्ञविरचिते व्यवहार-रत्ने कृष्यादिप्रकरणम् ॥२॥ ❋ गृहस्थानां परो धर्मः पाणिग्रहणमेव च ॥ तस्मात् तत्समयः स्वीयदेशरीत्योच्यतेऽधुना ॥ १ ॥ द्वितीया दशमी चैव

---

१ अत्र "अस्वाध्यायान्विवर्जयेत्" इतिआगमकल्पद्रुमेऽभिधानादनध्यायदिने दीक्षा निषिद्धा ॥ तथाच तत्रैव "मौञ्जीबन्धोक्तवत्सर्वं दीक्षाकाले विचिन्तयेत् । स्थिरभे मौञ्जिभे चैव दीक्षा कार्याशुभोदये " इति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तृतीयैकादशी तथा ॥ पंचमी सप्तमीचैव प्रशस्तोद्वाहकर्म्मणि ॥ २ ॥ वर्ज्जनीया कुहू रिक्ता शेषास्तु मध्यमाःस्मृताः ॥ कुजार्कशनिवाराश्च परित्याज्याः प्रयत्नतः ॥३॥ वारवेलां च भद्रां च मासान्तदिवसानिच ॥ दग्धातिथिं च भान्तं च यत्नतः परिवर्ज्जयेत् ॥ ४ ॥ जन्मर्क्षपुष्यनक्षत्रं ग्रहोत्पातयुतं दिनम् ॥ षट्काष्टकं च दम्पत्यो रुद्वाहे संत्यजेद्बुधः ॥ ५ ॥ याम्यायने विमार्गे च परित्यज्य विचक्षणैः ॥ सौम्यायने[2] विचैत्रे तु प्रकुर्य्यात् पाणिपीडनम् ॥ ६ ॥ रोहिण्युत्तररेवत्यो मूलं स्वाती मृगो मघा ॥ अनुराधा च हस्तश्च विवाहे मंगलप्रदाः ॥ ७ ॥ कन्यामिथुनमीनेषु वृषचापतुलासु च ॥ उद्वाहः सुप्रशस्तः स्यादिति प्राह पराशरः ॥ अथ गणविचारः ❋ हस्तः पुष्यः श्रुतिः स्वाती मृगः पौष्णः पुनर्वसू । अनुराधाश्विनीचैव कथितो देवतागणः ॥ ९ ॥ त्रिपूर्वा त्र्युत्तराण्याद्र्द्रा रोहिणी भरणी तथा ॥ मनुष्याख्यो गणः प्रोक्तो ज्योतिश्शास्त्रविशारदैः ॥ १० ॥ मघाऽश्लेषा विशाखा च कृत्तिका शत[3]तारकाः ॥ चित्राज्येष्ठा धनिष्ठा च मूलं रक्षोगणाः स्मृतः ॥ ११ ॥ स्वगणे परमा प्रीति र्मध्यमा देवमर्त्ययोः । मर्त्यराक्षसयोर्म्मृत्युः कलहो देवरक्षसोः ॥१२॥

---

१ लग्नेषु इतिशेषः । २ उत्तरायणे । ३ शतभिषा ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अथ वर्णविचारः ❋ झषालिकर्कटाविप्राः क्षत्रोमेषो हरि र्द्धनुः । वृषः कन्या मृगो वैश्यः शूद्रो युग्मं तुला घटः ॥ १३ ॥ वरस्य वर्णतः कन्या नाधिका शुभदा स्मृता । समा च मध्यमा ज्ञेया नीचवर्णा सदाऽशुभा ॥१४॥ ❋ अथ योनिविचारः ❋ अश्विनी शततारा च वाजियोनिः स्मृता बुधैः । तथैव भरणी पौष्णो गजयोनिर्विधीयते ॥ १५ ॥ पुष्यः कृशानुः छागाख्यौ नागाख्यौ रोहिणीमृगौ । आर्द्रामूलमपिश्वानौ मूषकः फाल्गुनी मघा ॥ १६ ॥ मार्जारोऽदितिरश्लेषा गोजातिरुत्तरात्रयम् । लुलायौ[2] स्वातिहस्तौ च ज्यैष्ठामैत्रौ मृगाभिधौ ॥ १७ ॥ चित्रा द्विदैवतेव्याघ्रौ श्रुत्याषाढौच मर्कटौ । पू-भा धनिष्ठा सिंहाख्यौ नकुलश्चाभिजित्स्मृतः ॥ १८ ॥ आसांप्रोक्तभयोनीनां मित्रता शत्रुतापिच । चिंतनीया विवाहेषु लौकिकव्यवहारतः ॥१९॥ ❋अथ वधूप्रवेशविचारः ❋ विवाहतः षोडशवासरान्तरं समाद्रिपचांकदिने प्रशस्तः । बधूप्रवेशो विषमेऽह्नि मासे संवत्सरेवापि तदग्रतः स्यात् ॥२०॥ हस्तत्रये ब्रह्मयुगे मघायां पुष्ये धनिष्ठाश्रवणोत्तरेषु । मूलानुराधाद्वयरेवतीषु स्थिरेषुलग्नेषु वधूप्रवेशः ॥ २१ ॥ जीवेन्दुशुक्रेषु शनै

---

१ क्षतोनाशात्त्रायतेइतिक्षत्त्रः क्षतृण्ः । २ महिषौ ।

३ षोडशदिवसावधि । ४ सप्त-सप्तम-पंचम-नवम-दिने ॥

५ षोडशवासरानन्तरम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्वरेत्र वधूप्रवेशः शुभदोनराणाम् । षष्ठ्यष्टमी विष्णु-
युता च रिक्तासदानिषिद्धा बुधवासरश्च ॥२२॥ न शुक्र-
दोषो नच सूर्य्यदोषः ताराबलं नेन्दुबलं न योज्यम् ।
उद्वाहिताया नवकन्यकायाः प्रोक्ते दिनादौ किलको-
विदेन ॥२३॥ प्रयाणोक्ते प्रयाणः स्यात् प्रवेशोक्ते प्रवे-
शकः । सुन्दरीशर्म्मगीतेन वाद्येन सह शोभनः ॥२४॥
वसेतां दम्पती तत्र वंशनागादिचित्रिते । स्थानेनिवृत्त-
मथुन्यौ[1] यावद्रात्रिचतुष्टयम् ॥ २५ ॥ विवाहात् प्रथमे
पौषे चाषाढ़े चाधिमासके । श्वश्रूगेहेवसेन्नस्त्री चैत्रे-
तातगृहेतथा ॥२६॥ ❀अथ द्विरागमनादिविचारः❀
ओजे[2] सम्बत्सरे वध्वा द्विरागमनकर्म्मच । घटालिमेषगे
सूर्य्येद्व्यङ्क[3]ागेषु शुभं स्मृतम् ॥२७॥ मृदुध्रुवक्षिप्रचरेऽपि
मूले तिथौ गमोक्ते शुभवासरे च । रवीज्यशुद्धे समये
वधूनां द्विरागमः शुक्लदले प्रशस्तः ॥२८॥ दक्षिणः सं-
मुखः शुक्रो द्विरागमन एवहि । दम्पत्योः सौख्यवृद्ध्य-
र्थं त्यक्तव्यः सर्वदाबुधैः ॥ २९ ॥ रेवत्यादि मृगान्तं च
यावत् तिष्ठति चंद्रमाः । तावत् शुक्रो भवेदन्धः संमुखो
दक्षिणोऽपि सन् ॥ ३० ॥ उदयति दिशि यस्यां याति
यत्र भ्रमात्[4] वा । विचरति च भचक्रे येषु दिग्द्वारभेषु ॥
त्रिविधमिह सितस्य प्रोच्यते संमुखत्वम् । मुनिभिरु-

१ कर्म्मण्यत्रष्यञ्प्रत्ययः । मिथुनयोःकर्ममैथुन्यम् ।
२ विषमे । ३ द्वितीय-नवम-लग्नेषु । ४ भ्रमणवशात् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दय एव त्यज्यते तत्र यत्नात् ॥३१॥ काश्यपेषु वशिष्ठेषु भृग्वत्र्यांगिरसेषुच॥ भारद्वाजेषु वात्सेषु प्रति शुक्रोनदुष्यति॥३२॥ पृष्ठेङ्गः संमुखः शुक्रो न दोषःशुक्र संमुखे। संमुखेङ्गः सिते पृष्ठे दोषहन्ता न को भवेत् ॥३३॥ पित्रागारे कुचकुसुमयोः सम्भवो वा यदि स्यात्। पत्युः शुद्धिर्न भवति रवेः संमुखो वापि शुक्रः शस्तेलग्ने गुणवपि तिथौ चंद्रतारानुकूळे स्त्रीणांयात्रा भवति सफला सेवितुं स्वामिवेस्म ॥३४॥ सितमश्वं सितं वस्त्रं हेममौक्तिकसंयुतम्। यत्नात् द्विजातये दद्यात् प्रतिशुक्रप्रशान्तये ॥३५॥ दैत्यमन्त्री दिवादर्शी उशनाभार्गवः कविः। श्वेतोऽथ कुण्डली कायो वीथीमार्गगतस्तथा ॥३६॥ एतानि भृगुनामानि यः कीर्त्तयति नित्यशः। प्रतिशुक्रो न तस्यास्ति लक्ष्मीमायुश्च विन्दति ॥३७॥ ❋ अथ नवीनशय्याद्यारोहणदिवसमाह ❋ मैत्रेन्दुपौष्णपितृभादितिवाजिचित्रा-

---

१ एषुगोत्रेषु (एतद्गोत्रभवेषुवरेषु) २ कोब्रह्मापि न भवेत् ॥

३ यद्यपि द्विरागमे (गृहकरणे) पत्युरविशुद्धिरपेक्षिताऽथचसमय शुद्धिरपि। यथाहुर्नृसिंहठक्कुरा रत्नमालायाम् 'उपनयनं गोदानं पाणिग्रहणं गृहप्रवेशश्च। (गृहप्रवेशगमनानि) अस्तमितेषुनकुर्यात्सुरुगुरुभृगुपुत्रचन्द्रेषु'। इति। एतेनकृष्णपक्षोऽप्यत्र (द्वि.ग.) निषिद्धएव। एवं 'रविशुद्धौगृहकरणमि' तिच तथाप्युक्तकारणवशादिमेदोषाअत्रोपेक्षणीयाः ॥ तत्रप्रतिशुक्रदोषोऽभ्यर्हितइतितच्छांतिमाह-सितमित्यादि ३५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

हस्तोत्तरात्रयहरीज्यविधातृभानि । एतेषु भेषु शयना सनपादुकादिसम्भोगकार्य्यमुदितं मुनिभिःशुभाहे ३८ * अथोद्वर्त्तनादिविचारमाह * उद्वर्त्तनविधानं च स्त्रियो वा पुरुषस्यवा । दशम्यां च त्रयोदश्यां द्वितीया यां विवर्ज्जयेत् ॥३९॥ *अथ वस्त्रप्रक्षालनविचारः* शनिभौमदिने श्राद्धे कुहूषष्ठीनिरंशके ॥ वस्त्राणां क्षा-रसंयोगो दहत्यासप्तमं कुलम् ॥४०॥ * अथ तैलाभ्यंगविचारः * रवौ गुरौ भृगौ भौमे षष्ठां संक्रान्तिवा-सरे । चित्रावैष्णवहस्तेषु तैलाभ्यंगं न कारयेत् ॥४१॥ * अथ तैलाभ्यंगे निषिद्धवाराणां प्रतीकारमाह * रवौ पुष्पं गुरौ दूर्वां भूमिं भूमिजवासरे ॥ भार्गवे गो-मयं दद्यात्तैलदोषोपशान्तये ॥४२॥ सार्षपं सघृतं वापि यत्तैलं पुष्पवासितम् ॥ अदुष्टं पक्वतैलं च स्नानाभ्यंगे च नित्यशः॥४३॥ *अथपुंसांवस्त्रधारणदिवसमाह* ब्रह्मानुराध[1]वसुपुष्यविशाखहस्तचित्रोत्तराश्विपवनादि-तिरेवतीषु ॥ जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौधार्य्य-नवं वसनमीश्वरविप्रतुष्ट्या ॥ ४४ ॥ * अथ पुंसां-भूषणपरिधानदिवसमाह * बुधगुरुसितवारे त्यक्तरि-क्तातिथौ च पितृकरवसुचित्रामैत्रपुष्योत्तरेषु ॥ रजत-कनकरत्नं शंखदन्तप्रवालम् शुभदमिहसमस्तं धार्य्य-

---

१ अत्रसाधनमुक्तमधस्तात् ॥ (२३पृ.)

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

माणंनराणाम् ॥ ४५ ॥ अथ स्त्रीणांवस्त्रपरिधानदिवस-
माह * धनिष्ठारेवतीचैव तथाहस्तादिपंचकम् ॥
अश्विनीगुरुशुक्राभ्यां स्त्रीणांवस्त्रस्यधारणम्[२] ॥ ४६ ॥
*अथसूचीकर्म्मदिवसमाह* चित्रादित्याश्विनीमैत्र
श्रविष्ठा[३]सु शुभेदिने ॥ सूचीकर्म्मविधानंच शुभं प्रो-
क्तंमनीषिभिः ॥ ४७ ॥ * अथ स्त्रीणांभूषणपरिधान
दिवसमाह * नाशत्यपौष्णवसुभे करपंचकेच मार्त्त-
ण्डभौमगुरुदानवमंत्रिवारे ॥ लाक्षासुवर्णमणिविद्रुम-
शंखदन्तरक्ताम्बराणि विभृयात्प्रमदागणश्च ॥ ४८ ॥
* अथ निषिद्धदिवसमाह * प्रजापतेर्भेतिसृषूत्तरासु-
पुनर्वसोश्चद्वितयेनदध्यात् ॥ प्रवालरक्ताम्बरहेमशंखान्
भर्तुर्य्यदीक्षेदवलायुरिष्टम् ॥ ४९ ॥ * अथाद्यपा-
कारम्भमैथुनकर्म्मणांदिवसमाह * अष्टम्यामपिसंक्रा-
न्तौ तथैवरविवासरे । मत्स्यमांसक्रियां त्याज्या दर्शे
मैथुनकर्म्मच ॥ ५० ॥ * अथ स्त्रीणांकेशबन्धन-
दिवसमाह * ध्रुवमृदुलघुवर्गे विष्णुमूलानिलर्क्षे शशि-
शनिदिनवर्ज्ये[३] गोद्विदेहोदयेषु ॥ उपचयगतपापे केन्द्र-
कोणेचसौम्ये सुतिथिकरणयोगेबालबन्धःशुभेन्दौ ॥ ५१ ॥

---

१ उपलक्षितमेतन्नक्षत्रजातम् २ अधिकरणेऽतूल्युद्धार्यतेस्मिन्निति ।
३ धनिष्ठासु । ४ अस्य नदध्यादित्यनेनान्वयः । ५ अशनम् ।
६ नवमद्वितीयलग्नेषु ।
७ बहुव्रीहिः सप्तम्यर्थे । शुभइन्दुर्यस्मिन्निति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

इति मैथिल श्रीभानुनाथदैवज्ञविरचिते व्यवहाररत्ने विवाहादिप्रकरणम् ॥ ४ ॥ ❀ रजोमूलःपुत्रो भवति समयाधीनमपि तद्रजस्तस्मात्तस्यप्रथितवचनालोकनतया । मयाप्यारब्धेयं समयरचनानिन्द्यशुभयोर्य्यतः पुत्रेणैवप्रभातिसुखंस्वर्गसदृशम् ॥१॥ यदाद्यंरजोदर्शनं मार्गशीर्षेसवैशाखमासेतथा श्रावणेच । तपस्ये च माघेभवेदंगनानां वरिष्ठं तदन्येषु मासेषु निन्द्यम् ॥२॥ शुक्लपक्षे शुभे वारे सत्तिथौ सत्तनौ दिवा । श्रुतित्रयेमृदुक्षिप्रध्रुवस्वातौ शुभंस्मृतम् ॥ ३ ॥ ❀ अथ प्रथमर्त्तौ परिधानवस्त्रफलम् ❀ शुभगा श्वेतवस्त्रा स्याद्रोगिणी रक्तवाससा । नीलवस्त्रधरा नारी विधवा कुलटापि च ॥ ४ ॥ भोगिनी पीतवस्त्राच सुभगा लोमवस्त्रिणी[१] । कृष्णेतुविधवानारी सुभगाच विवस्त्रिणी ॥५॥ दुर्भगा जीर्णवस्त्राच नव्यवस्त्रेतु पुत्रिणी । आलोहिते भवेद्वन्ध्या ऋतौ वस्त्रफलं स्मृतम् ॥ ६ ॥ ❀ अथ वेलाफलम् ❀ प्रातः कालेरजः स्त्रीणां प्रथमं शोकवर्द्धनम् । मध्याह्नेच धनप्राप्तिरपराह्णेच मध्यमम् ॥ ७ ॥ पूर्वरात्रे सुखावाप्तिर्म्मध्यरात्रेधनक्षयः । तथैवापररात्रेच प्रथमर्त्तुफलंस्मृतम् ॥ ८ ॥ सन्ध्ययोरुभयोर्वेश्या दुर्भगा सर्वसंधिषु[३] । तथाभद्रासु निद्रासु ग्रहणे संक्रमेषु

---

१ उपलक्षणेतृतीया । २ लोमवस्त्रंविद्यतेयस्याइतिमत्वर्थेइनिः । ङीप्
३ तिथ्यर्क्षादिसन्धिकालेषु ।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

च ॥ ९ ॥ ❋ अथ शोणितवर्णफलम् ❋ शशशोणितसंकाशेऽथवालक्तकसन्निभे । पुत्रकन्याप्रसूतिः स्यान्नीलेतुस्यान्मृतप्रजा ॥ १० ॥ सुभगा पुत्रसंयुक्ता शुक्लवर्णेसदार्त्तवे । पीतेच स्वैरिणी प्रोक्ता काकवंध्या च पांडुरे ॥ ११ ॥ ❋ अथ स्थानफलम् ❋ गृहमध्ये सुखावाप्तिर्वहिर्देशे वियोगिनी । शय्यायां सुखदा भूमावनेकापत्यसन्निधिः ॥ १२ ॥ देवांगणेपुत्रहानिर्गवां स्थानेऽन्यवेश्मनि । देहल्यांवापितुर्गेहेनिन्दितंप्रथमार्त्तवम् ॥ १३ ॥ ❋ अथ स्नानविचारः ॥ रजः पाताच्चतुर्थेह्नि स्त्रिया सुभगयासह । स्नायादवश्यंतिथ्यर्क्षवारादीन्नावलोकयेत् ॥१४॥ ❋ अथ गर्भाधानविचारः❋ स्त्रीणामृतुर्भवति षोड़शवासराणि[1] तत्रादितः परिहरेच्च निशाश्चतस्रः । युग्मासुरात्रिषु नरा विषमासु नार्य्यः कुर्य्यान्निषेकंमथतास्वपि पर्ववर्ज्यम् ॥ १५ ॥ चतुर्द-

१ यावत् । तथा च योगियाज्ञवल्क्यः । षोड़शर्त्तुर्निशाः स्त्रीणां तस्मिन्युग्मासुसंविशेत् । ब्रह्मचार्य्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत् । इति । स्त्रीणां गर्भधारणयोग्यावस्थोपलक्षितःकालऋतुः । स च रजोदर्शनदिवसादारभ्यषोड़शाहोरात्रस्तस्मिनृतौयुग्मासुसमासुरात्रिषु । रात्रिग्रहणाद्दिवाप्रतिषेधः । संविशेत् । गच्छेत्पुत्रार्थमिति शेषः । युग्मासु इतिबहुवचनं समुच्चयार्थमतश्चैकस्मिन्नपिऋतौ अप्रतिषिद्धासुयुग्मासुसर्वासुरात्रिषुगच्छेत् एवं गच्छन्ब्रह्मचार्येवभवति । अतोयत्रब्रह्मचर्यंश्राद्धादौचोदितं तत्र गच्छतोऽपिनब्रह्मचर्य स्खलनदोषोस्ति ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्यष्टमीचैव अमावास्याथ पूर्णिमा । पर्वाण्येतानिराजेन्द्र रविसंक्रांतिरेवच ॥१६॥ रेवतीं च मघांमूलं पित्रोः श्राद्धदिनन्तथा । दिवाच परिघाद्यर्द्धं गर्भाधानेपरित्यजेत् ॥ १७ ॥ ❀ अथ विहितदिनादिविचारः ❀ वासराः पुत्रदागर्भेकुजार्कगुरवोध्रुवम् । कन्यादौभृगुशीतांशूक्लीबदौ शनिचन्द्रजौ ॥१८॥ ❀ अथ तिथिविचारः ❀ नन्दाभद्रास्मृतापुंसिस्त्रीषुपूर्णाजयास्मृता। ऋक्तानपुंसके ज्ञेयातस्मात्तांपरिवर्ज्जयेत् ॥ १९ ॥ ❀ अथात्र नक्षत्रविचारः ❀ पुष्यार्कचन्द्रशिवमूलपुनर्वसूश्च आषाढयुग्महरिभाद्रपदद्वयंच । एतानि पुंसिकथितानि शुभानि भानि अन्येषु गर्भपतनादिभयानि भेषु ॥२०॥ ❀ अथ पुंसवनम् ❀ मासेद्वितीयेप्यथवा तृतीये पुन्नामधेये ग्रहेऋक्षचक्रे । अक्षीणचन्द्रे कुजभानुजीवे वारे शुभंपुंसवनादि कर्म्म ॥ २१ ॥ ❀ अथ सीमन्तकर्म्म ❀ मासेशे प्रबलेशुभेक्षितविधौ मासेऽथ षष्ठेऽष्टमे । मैत्रपुंसवनोदितर्क्षसहिते रिक्ताविहीनेतिथौ । सीमन्तोन्नयने मृगाजरहिते लग्नेनवांशोदये । योज्यं पुंसवनोदितं यदपरं तत्सर्वमत्रापिच ॥२२॥ ❀ अथ गर्भाधानसमयात्प्रतिमासं मासाधिपकथनपूर्वकं गर्भस्थस्यावयवलक्षणमाह ❀ आद्यस्य मासस्यभृगुर्विनेता तस्मिन् भवेच्छोणितशुक्रयोगः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तद्रूपचेष्टाबलहानिदीप्त्या गर्भस्यवाच्यं सकलंजन-
न्याम् ॥ २३ ॥ द्वितीयमासाधिपतिः कुजश्चतस्मिन्
घनतस्यभवेत्समन्तात् । जीवस्तृतीयस्यकरांघ्रिवक्त्र-
ग्रीवादिकंतत्रभवेत्समग्रम् ॥ २४ ॥ सूर्य्यश्चतुर्थस्यपतिः
प्रदिष्टोह्यस्थीनि तत्रप्रभवन्तिपुंसाम् । मज्जाच मेदश्च
समांसरक्तंव्यक्तिस्समायातिविभागतश्च ॥ २५ ॥ त-
स्मिन् ससौरिः किलपंचमस्यपतिः समत्वक्कृतिमात-
नोति । प्राप्नोतिपुष्टिं विविधांचगर्भोव्यक्तं समागच्छ-
तिकायजातम् ॥ २६ ॥ षष्ठस्यचन्द्रो विभुतामुपैतिरो-
माणितत्रप्रभवन्तिगात्रे । रदाश्चजिह्वाप्रहरप्रभावेगुह्यं
सरंध्रंप्रभवेच्चतस्मिन् ॥ २७ ॥ स्याच्चन्द्रसूनुः किलसप्त-
मस्यतस्मिन् स्मृतिः स्यात्सततंनराणाम् । पंचेन्द्रियत्वं
च विवेकताच कोऽहंकुतोऽत्राश्रयमभ्युपेतः ॥२८॥ ल-
ग्नाधिनाथस्त्वथवाष्टमस्यमासस्यतस्मिन्प्रवराबुभुक्षा ।
भवेन्मनुष्यस्य ततः सुतृप्तिर्भुक्तेजनन्यारसभावसंगात्
॥ २९ ॥ नक्षत्रनाथोनवमस्यनाथस्तस्मिन्विरक्तिर्वि-
विधा नराणाम् । गर्भाश्रयाद्दुःखमनन्तमेकं कृतंस्मृतं
पूर्वशुभाशुभस्य ॥ ३० ॥ दिवाकरस्तद्दशमाधिनाथ-
स्तस्मिन्प्रदिष्टः प्रभवोनराणाम् । तस्मिन्यदास्यात्व्य-
यगः शशांकस्त्वाधानलग्नाज्जननन्तदैव ॥ ३१ ॥ ❀

अथ सूतिकागृहनिर्म्माणप्रवेशकालावाह ❀ प्रसवार्थं

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गृहंकुर्य्याददित्यांशुभवासरे। रोहिण्यांश्रवणायांचप्रवेश-
स्तत्रकीर्त्तितः॥३२॥ *अथप्रसूतीस्नानदिवसमाह*
मैत्राश्विध्रुवहस्तेषुस्वातौपौष्णाभिधेऽपिच । कुजार्के-
ज्यदिनेष्वेवसूतीस्नानंशुभंस्मृतम् ॥ ३३ ॥ मिश्रा-
र्द्रात्रितयेमूलेतक्षश्रुतिमघान्तके । वसुषड्विरिक्तायां
सूतीस्नानंविवर्ज्जयेत ॥३४॥ * अथ शिशोर्म्मातुः
स्तनपानदिवसमाह * रिक्ताभौमं परित्यज्य विष्टिं
पातंसवैधृतिम । मृदुध्रुवक्षिप्रभेषुस्तनपानंहितंशिशोः
॥३५॥ * अथ मासपूर्त्तौसूतीजलपूजनदिवसमा-
ह * नन्दासुपूर्णासुजयाज्ञचन्द्रजीवे च हस्तेश्रवणे
मृगेच । दित्यद्वयेस्त्रीजलपूजनंच कुर्य्याच्छिशूनांचिर-
जीवनाय ॥ ३६ ॥ * अथ शिशूनांपालनाशयन-
दिवसमाह * जीवेन्दुशुक्रे शशिपुष्यपौष्णध्रुवेषुपौ-
ष्णत्रितयेकरेच । दित्यश्वभेपक्षसितेतरेच स्यात्पालना-
यां शयनं शिशोः सत् ॥ ३७ ॥ * अथ शिशोर्न्ना-
मकरणमाह * ध्रुवमृदुचरवर्गे वाजिहस्तासमेते । क्ष-
यमुदयमथैषांसत्सुकेन्द्रस्थितेषु ॥ रविशिवमितवारे
तत्कुलाचारतोवा । शुभदिनतिथियोगेनामकुर्य्यात्प्रश-
स्तम् ॥ ३८ ॥ शर्म्मान्तंब्राह्मणस्योक्तं वर्म्मान्तं क्ष-
त्रियस्यच ॥ गुप्तदासान्तकन्नामप्रशस्तंवैश्यशूद्रयोः
॥३९॥ देव्यन्तं द्विजकन्यानां शूद्रायांनविधिः स्मृतः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नामंगल्यं च तत्रापि नाम कुर्य्याद्विचक्षणः ॥४०॥
ओजाक्षरंसदास्त्रीणां पुरुषस्य समाक्षरम् । दीर्घमक्षरम-
स्पष्टं यत्नतोवर्ज्जयेत्सुधीः ॥ ४१ ॥ ❋ अथ दोला-
द्यारोहरणम् ❋ दोलागेहेऽर्कभात्पंच शरपञ्चेषुसप्तभैः॥
नैरुज्यंमरणंकार्श्यंव्याधिः मौख्यं क्रमाच्छिशोः ॥४२॥
धृतिभूपार्कदिग्दन्तप्रमिते शुभवासरे । मृदुक्षिप्रध्रु-
वर्क्षेषुदोलारूढिः शुभास्मृता ॥ ४३ ॥ ❋ अथ ता-
म्बूलदानदिवसमाह ❋ चरध्रुवमृदुक्षिप्रसद्वारेसत्ति-
थौसुधीः । सार्द्धमासद्वयेदद्यात्ताम्बूलंप्रथमंशिशोः ॥
४४ ॥ ❋ अथ गृहान्निष्क्रमणदिवसमाह ❋ ग-
मोक्तमभयेकुर्य्याच्छिशोर्न्निष्क्रमणं गृहात । चतुर्थे
मासिसूर्य्याद्यैर्द्वादशाहेपिजन्मतः ॥ ४५ ॥ ❋ अथ
शिशूनां भूम्युपवेशनम् ❋ पृथ्वींवराहंविधिवत् प्रपूज्य
शुद्धेकुजेपंचममासिवालम् । क्षिप्रध्रुवेसत्तिथिवासराद्ये
निवेशयेत्कौ[1] कटिसूत्रवद्धम् ॥ ४६ ॥ ❋ अथान्न-
प्राशनम् ❋ षष्ठादियुग्ममासेषु शिशूनामन्नभोज-
नम् । कन्यानांपंचमान्मासादयुग्मेभोजनंहितम् ॥
४७॥ द्वितीयाचतृतीयाच पंचमीदशमीतथा । त्रयो-
दशीशिशोरन्नप्रासनेऽतिशुभास्मृता ॥ ४८ ॥ शनि-
भौमदिनंत्यक्त्वामृदुक्षिप्रचरध्रुवे । गोकन्यायुग्ममीनांगे
शिशुर्घ्यात्सितेदळे ॥ ४९ ॥ ❋ अथ शिशोराद्य-

१ पृथिव्याम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्षौरमाह ❀ सुरासुरगुरोः शुद्धिर्वेदोक्तप्रक्रियापिच।
शिशूनांप्रथमक्षौरेचिन्तनीयानकुत्रचित् । ५० ॥ तृ-
तीयाद्विषमेवर्षेत्यक्त्वैत्रोत्तरायणे । सत्तिथौशुभवा-
रेच क्षौरमाद्यंहितंशिशोः ॥ ५१ ॥ शाक्रोपेतेविमैत्रेच
मृदुक्षिप्रचरर्क्षके । क्षौरमाद्यंशिशूनांसज्जन्ममासमादिकं
विना ॥५२॥ ❀ अथनित्यक्षौरविधिः ❀ क्षौरंभार्ग-
ववासरे शुभकरंवारेऽथजीवस्यच । कर्त्तव्यंबुधसोमयो-
रतिशयं भूतातिरिक्तेतिथौ ॥ भुक्ताभ्यक्तनिरासनैश्च
समरग्रामान्तरप्रस्थितैः । स्नातैर्न्नोनवमेऽह्नीतिवि-
बुधाः सं[1]ध्योर्न्निशायांजगुः ॥ ५३ ॥ ❀ अथाद्य-
श्मश्रुकर्म्म ❀ षष्ठ्यष्टमीञ्चतुर्थींचसि[2]नीवालींचतुर्द्द-
शीम् । नवमींचा[3]र्कमन्दरान्श्मश्रुकर्मणिवर्ज्जयेत् ॥५४॥
❀ अथ कर्णवेधः ❀ नोजन्मेन्दुभमाससूर्य्यरविज-
क्ष्माजाहयाम्यायने शस्तेऽर्केलघुविष्णुयुग्ममृदुभस्वा-
त्युत्तरादित्यभैः । सौम्यैस्त्र्या[5]यत्रिकोणकण्टकगतैःपापै-
स्त्रि[4]लाभारिगैरोजा[6]ब्दे श्रुतिवेधइज्यसितभे लग्ने तु का-
ले शुभे॥५५॥ ❀अथाक्षरारम्भः❀ गणेशंगरुडेशं च
वाणींलक्ष्मींप्रपूज्यच । सौम्यायनेशुभेकालेस्वाध्याये पं-
चमाब्दकः ॥ ५६ ॥ मृदुक्षिप्रश्रुतौस्वातौ मित्रर्क्षेशिव-
भाद्वये । चरोनाङ्गेशुभे वारे गृह्णीयात्कठिनींशिशुः

---

१ सन्धिकालयोरुभयोः सन्ध्ययोरितियावत् ॥ २ अमावास्यायाम् ।
३ रवि-शनि-कुजान् । ४ एकादश-नवम-पञ्चम-षष्ठस्थानस्थैः ।
५ तृतीयै-कादश-षष्ठस्थैः । ६ विषमाब्दे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

॥ ५७ ॥ ❋ अथोपनयनदि वसमाह ❋ चौला-
दिकंचतुः कर्म्म युगपन्मैथिलेषुच । तत्रोपनयनं
श्रेष्ठं तस्मात्तत्प्रक्रियोच्यते ॥ ५८ ॥ गर्भाष्टमेऽष्टमे-
वाब्दे ब्राह्मणस्योपनायनम् । राज्ञामेकादशेमौंजीबं-
धनंद्वादशे वशः ॥५९॥ ❋अथ व्रात्यकालविचारः❋
आषोड़शाब्दाद्विप्रस्यसावित्रीपतनंभवेत् । द्वाविंश-
तेस्तथाराज्ञश्चतुर्विंशतितोविशः ॥ ६० ॥ ❋ अथ गुरु-
शुद्धिः ❋ श्रेष्ठोगुरुस्त्रिकोणायद्विसप्तस्थानसंस्थितः ॥
रिष्फाष्टतुर्य्यगंहित्वामध्यमोऽन्येषुवेश्मसु ॥६१॥ आद्ये
तृतीयभवनेरिपुरन्ध्रयोर्वादुःखंकरोतिनियतंविपदंचजी-
वः । अन्त्यंचतुर्थदशमंप्रवदन्तिमध्यंक्षेमंकरोतिनियतं
परिशेषराशौ ॥ ६२ ॥ ❋ अथानिष्टगुरुप्रतीकारमाह ❋
स्वोच्चस्वभेस्वमैत्रेवास्वांशेवर्गोत्तमेगुरुः । रिष्फाष्टतुर्य्य
गोपीष्टोनीचारिस्थः शुभोप्यसत् ॥ ६३ ॥ ❋ अथर-
विशुद्धिविचारः ❋ श्रेष्ठोरविस्त्रिदशलाभविपक्षसंस्थो
मध्योद्विपंचमगतोनवमेतथैव । जन्माष्टसप्तहिबुकांत्य-
विनाशकारीसद्भिस्त्रिधानिगदिता रविशुद्धिरेषा ॥६४॥
❋ अथमासशुद्धिः ❋ नंक्रादिकंसमारभ्ययावत्त्र्यं-
शः शुचेरपि । तावदेवोपनीतिः स्याद्वटूनामितिकी-

१ नवम पञ्चमद्वादशद्वितीयसप्तमस्थानस्थः । २ रिष्फोद्वादशः ।
३ षष्ठ-नवमयोः । ४ एकादश-षष्ठस्थः । ५ चतुर्थस्थानंहिबुकम् ।
६ मकरादिकम् । ७ आषाढस्यापि ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

र्त्तिता ॥ ६४ ॥ मार्गेमासितथाज्यैष्ठे क्षौरं परिणयंव्रतम् । ज्येष्ठपुत्रदुहित्रोश्चयत्नतः परिवर्ज्जयेत् ॥६६॥ आवश्यकेऽपिकर्त्तव्ये व्रतोद्वाहादिकर्म्मणि । कृत्तिकास्थंरविंत्यक्त्वाज्यैष्ठेज्येष्ठस्यकारयेत् ॥ ६७ ॥ जन्मोदये जन्मसुतारकासुमासेऽपि वा जन्मनि जन्मभे वा ॥ व्रतेऽपिविप्रः श्रवणंविनापि प्रज्ञाविशेषैः प्रथितः पृथिव्याम् ॥६८॥ जन्ममासादिकंत्याज्यंसर्वथायत्नतोवुधैः । ज्येष्ठपुत्रदुहितोश्चव्रतोद्वाहादिकर्म्मसु ॥ ६९ ॥ जन्ममासनिषेधेतुदिनानिदशवर्ज्जयेत् । आरभ्यजन्मदिवसाच्छुभाः स्युस्तिथयोऽपराः॥७०॥ ❋ अथोपनयनेचैत्रप्रशंसा ❋ गोचराष्टकवर्गाद्यैर्य्यदि शुद्धिर्न्नलभ्यते । तदोपनयनंकार्य्यं चैत्रेमीनगतेवौ ॥ ७१ ॥ ❋ अथ शाखाधिपबलम् ❋ शाखाधिपतिवारश्च शाखाधिपबलंशिशोः । शाखाधिपतिलग्नंच दुर्ल्लभं त्रितयं व्रूते[1] ॥७२॥ ऋग्वेदाधिपतिर्ज्जीवोयजुर्वेदाधिपः सितः । सामवेदाधिपोभौमःशशिजोऽथर्ववेदराट् ॥७३॥ यथाशाखाधिपस्यात्रवलंप्रोक्तंविचक्षणैः ॥ तथावर्णाधिपस्यापि व्रतवन्धेविचारयेत् ॥७४॥ सुरासुरगुरू विप्रौ क्षत्रियौ रविभूमिजौ । वैश्यश्चन्द्रोबुधः शूद्रः प्रान्त्यजातिः शनैश्चरः ॥७५॥ ❋ अथ तिथिशुद्धिः ❋ द्वि-

---

१ उपनयने ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तीयायां तृतीयायां पंचम्यां दशमीत्रये । शनिभौमदि-
नं त्यक्त्वा मौञ्जीबन्धःशुभोभवेत् ॥७६॥ ❋ अथन-
क्षत्रशुद्धिः❋ तीक्ष्णध्रुवमृदुक्षिप्रत्रिपूर्वास्वदितिं विना ।
चरर्क्षेऽपि प्रशस्ता स्यादुपनीतिर्वटोः किल ॥ ७७ ॥
❋ अथ तात्कालिकानध्यायाः ❋ न रात्रौ नचसं-
ध्यायां नानध्याये न भिन्नभे । न कृष्णे नापराह्णेच
नाशौचे नगलग्रहे ॥७८॥ नोप[1]रागे न भद्रायां न प्र-
दोषादिसंयुते । नाकालवर्षणेचैव गर्जिते नोपनायन-
म् ॥७९॥ ❋ अथ गलग्रहलक्षणम् ❋ अष्टमी सप्त-
मीविद्धा त्रयोदश्या चतुर्दशी । द्वितीया प्रतिपद्विद्धा
गलग्रहउदाहृतः ॥८०॥ ❋ अथ प्रदोषलक्षणम् ❋
चतुर्थीप्रथमेयामेसार्द्धयामेचसप्तमी । त्रयोदश्यर्द्धरात्रे
च प्रदोषः सर्वघातकः ॥८१॥ ❋ अथाकालवृष्टिलक्ष-
णम् ❋ पौषादिचतुरोमासान्ज्ञेयावृष्टिरकालजा । व्रता[2]-
ह्नि पूर्वसन्ध्यायां गर्जितस्यापि दूषणम् ॥ ८२ ॥
❋अथ लग्नशुद्धिः❋ गुरुशशिभृगुपुत्रे केन्द्र[3]संस्थे त्रि-
कोणे । रिपु[4]सहजगृहायेसूर्य्यमाहे[5]यमन्दे । वृषतुरग-
तुलायां सिंहमीने प्रशस्तं व्रतकरणमिहोक्तं नाष्टमस्थे

---

१ न ग्रहणदिने । २ उपनयनदिने । ३ ल-च-द-स. केन्द्राः । नवम-पञ्चमौत्रिकोणौ । ४ षष्ठ-तृतीयै-कादशे । ५ माहेयः कुजः । मन्दःशनिः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शशांके ॥८३॥ ❀अथ विद्यारम्भः❀ कठिन्युदितदे-
वांश्च स्वविद्यां सूत्रकारकम् । शिवंनवग्रहांश्चैवपूज-
यित्वाविधानतः ॥ ८४ ॥ गुरुः पूर्वमुखः शिष्यं पश्चि-
मास्यं चपाठयेत् । नक्षत्रतिथिवाराद्यैः सर्वैः कठिनि-
कोदितैः ॥ ८५ ॥ धरण्यामृतुमत्यांच भूमिकम्पे त-
थैवच । अन्तरागमने चैव विद्यां नैव पठेन्नरः ॥
८६॥ ❀ अथ धनुर्विद्यारम्भः ❀ मघोत्तरापावक-
विष्णुचित्रा स्वात्यश्विजीवादितिमूलहस्ताः । वाराः
सिताकेज्यमहीसुतानामुक्ताधनुर्वेदविधौप्रशस्ताः ॥
८७॥ विचैत्रवृतमासादौ विभौमास्ते विभूमिजे ।
क्षुरिकाबन्धनं शस्तं नृपाणां प्राग्विवाहतः ॥
८७ ॥ ❀ अथ राजाभिषेकः ❀ मैत्रशाक्र-
करपुष्यरोहिणी वैष्णवाद्यतिसृषूत्तरासुच । रेवतीमृ-
गशिरोऽश्विनीष्वपि क्षमाभुजां समभिषेक इष्यते
॥ ८९ ॥ विलग्नजन्मेशदशाधिनाथमार्त्तण्डधात्रीत-

१ अक्षरारम्भक्रियाकठिन्या [ मृद्विशेषेण ] विधीयतइति तत्क्रियापि कठिनीत्युच्यते तत्रोदितादेवागणेशादयस्तान । २एतद्वचनं मत्स्य-सूक्तीयम् तथाचोक्तं ज्योतिषे ( शब्दकल्पद्रुमधृते ) रजोयुक्क्ष्मा-ऽम्बुवाचीस्यादौद्राद्यपादगे रवौ । नास्यां पाठोबीजवापो नाहिभी-र्दुग्धपानत ॥ मृगशिरसिनिवृत्तेरौद्रपादेऽम्बुवाची ऋतुमतिखलु-पृथ्वीवर्जयेत्त्रीण्यहानि इत्यादिरौद्रमार्द्रा ॥

३ पाठकालेगुरुशिष्ययोर्मध्येन गमने । मनुष्यकर्त्तृकेतदर्म्मार्जारा-दिगमने ऽप्यहाद्यन्यत्रोक्तंज्ञेयम् ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नयैर्बलिष्ठैः । गुर्विन्दुशुक्रैः स्फुरदंशुजालैर्म्महीपतीनामभिषेकइष्टः ॥ १० ॥ तारकाशशभृतोर्बलेदिने सद्ग्रहस्यचतिथावरिक्तके । जन्मभादुपचये स्थिरगेदयेभूभुजां समभिषेकइष्यते ॥ ११ ॥ ❋ इति मैथिल श्रीभानुनाथदैवज्ञ विरचिते व्यवहाररत्ने संस्कारप्रकरणम् ❋ ॥५॥ यःपण्डितो भवति तस्य विदेशयात्रा पात्रज्ञया समुचितार्थ्यधनार्ज्जनाय । तस्माद्वयंनिखिलशास्त्रविचारदक्षा रक्षासु लक्षितगमस्य दिनं वदामः ॥ १ ॥ ❋ अथात्रमासशुद्धिः ❋ मेषेधनुषि सिंहेच यात्रा सौख्यप्रदायिनी । खौकर्कालिमीनस्थे दुःखदाऽन्येषु मध्यमा ॥२॥ ❋ अथ तिथिशुद्धिः ❋ सिताद्या[1] द्वादशी षष्ठी सिनीवाली[2] च पूर्णिमा । रिक्ताष्टमी परित्याज्या यात्रायां सर्वथाबुधैः॥३॥ ❋अथात्रनक्षत्रशुद्धिः❋ हस्तेंदुमित्रश्रवणाश्विपुष्यपौष्णश्रविष्ठाश्च[3] पुनर्वसूच । श्रेष्ठानि धिष्ण्यानि नव प्रयाणे त्यक्त्वा त्रिपञ्चादिमसप्ततारा॥४॥ अजोविशाखःपवनः कृशानुः स्थाणुः कृतान्तः फणिभृन्मघाच । यात्रास्वनिष्टान्यपराणि भानि स्मृतानिनेष्टानि न निन्दितानि ॥५॥ शाक्रे च सौरिचन्द्राहे नैवपूर्वां दिशं व्रजेत् । गुरौच पूर्वभाद्रे च दक्षिणस्यान्तथैवच ॥ ६ ॥ रोहिण्यां

---

१ शुक्लप्रतिपत् । २ कुहूअमावास्येतियावत् ॥ ३ धनिष्ठाश्च ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सूर्य्यशुक्राहे न प्रतीचीमियान्नरः । कुजेबुधेऽर्य्यमर्क्षेच सौम्याशांचतथैवच ॥ ७ ॥ ❀ अथात्रवारशुद्धिः ❀ रवौशुक्रेव्रजेत प्राचीमवाचींच महीसुते । प्रतीचीं शनि चन्द्राहेतथोदीचींगुरोर्द्दिने ॥ ८ ॥ यद्दिनेषुव्रजेत्प्राचीमग्निकोणेपितद्दिने । प्राक्दक्षिणक्रमेणैवं सर्वज्ञेयं मनीषिभिः ॥९॥ क्षिप्रानुराधयाचैव गच्छेत्सर्वदिशास्वपि । विलोक्य चन्द्रतारादेर्बलमाशापतेरपि ॥१०॥

❀ अथानन्दादियोगविचारः ❀ आनन्दः कालदण्डश्च धूम्रोधाता तथैवच ॥ सौम्योध्वांक्षश्चकेतुश्च श्रीवत्साख्यस्ततः परम् ॥ ११ ॥ वज्रकं मुद्गरश्छत्रं मित्रं मानसमेवच । पद्मलुम्बोत्पातमृत्युकाणसिद्धिशुभाभिधाः ॥ १२ ॥ सुधामुशलगेगाख्यामातंगोराक्षसश्चरः ॥ स्थिरः प्रवर्द्धमानः स्यात्सप्तविंशतिरित्यपि ॥ १३ ॥ ❀ अथैषामानयनमाह ❀ दास्राद्रवौमृगाच्चन्द्रे कुजे सर्पात्करादबुधे ॥ गुरौ मैत्राद्भृगौ वैश्वान्मन्देगण्याश्च वारुणात् ॥१४॥ एतेयोगाः फलंदद्युः स्वस्वनामानुसारतः ॥ यात्रायामेवनान्यत्र ज्ञेयमित्यार्य्यबुद्धिभिः ॥ १५ ॥ ❀ अथ ध्रुवादिभे यात्राविचारः ❀ ध्रुवैर्म्मिश्रैर्नपूर्वाह्णे मध्याह्नेनचदारुणैः । नापराह्णे व्रजेत् क्षिप्रैर्म्मृदुभैर्न्न निशामुखे ॥ १६ ॥ उग्राख्यैर्म्मध्यरात्रे च चराख्यैर्न्न


Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निशान्तके ॥ हस्तश्रुतिमृगेज्यर्क्षैः सर्वकाले शुभोगमः ❋ अथचन्द्रास्थितिः ❋ ॥ १७ ॥ मेषेसिंहे च कोदण्डे पूर्वस्यां दिशि चन्द्रमाः । वृषे नक्रे च कन्यायांदक्षिणस्यांतथैवच ॥ १८ ॥ युग्मेकुम्भेतुलायांच चश्चिमेषु व्यवस्थितः ॥ कर्कवृश्चिकमीनेषु संस्थितश्चोत्तरांदिशम् ॥ १९ ॥ ❋ अथ यात्रायां तत्फलमाह ❋ संमुखेदक्षिणेचन्द्रः सर्वसिद्धिप्रदायकः । पृष्ठेवामेनिषिद्धः स्यादितिप्राहमुनीश्वरः ॥ २० ॥ प्रागादितस्तनौसूर्य्ये भार्गवे व्ययलाभयोः । कर्म्मस्थे धरणीपुत्रे राहौधर्म्मष्टिसंयुते ॥ २१ ॥ शनौद्यूनेविधौ वारिपंचमस्थे बुधेऽम्बुगे । गीष्पतौ भ्रातृवित्तस्थेलालाटीतिप्रकीर्त्तिता ॥ २२ ॥ अस्यांलालाटिकायांच यात्रा त्याज्या सदैवहि ॥ कुम्भकुम्भांशके वापिमीनलग्नेतथैवच ॥ २३ ॥ ❋ अथ योगिनीविचारस्तत्र प्रथमं तिथियोगिनीमाह ❋ पूर्वस्यामुदये दब्राह्मी प्रथमेनवमीतिथौ ॥ माहेशीचोत्तरस्यान्तु द्वितीयादशमीतिथौ ॥ २४ ॥ एकादश्यांतृतीयायांकौमारीवह्निकोणगा । चतुर्थीद्वादशीतिथ्योर्वैष्णवी नैर्ऋतिस्थिता ॥ २५ ॥ पंचम्यांचत्रयोदश्यां वाराही-दक्षिणेस्मृता ॥ षष्ठयांतिथौचतुर्द्दश्यामिन्द्राणी प-

---

१ व्याप्येतिशेषः २ धर्मस्थानंनवमम् ३ सप्तमस्थानस्थे ४ वारिअंबुचचतुर्थस्थानम् ५तृतीयद्वितीयस्थे ६ कुम्भनवमांशके ७ प्रतिपदि

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्चिमेस्थिता ॥ २६ ॥ पौर्णमास्यान्तु सप्तम्यामुत्तरे चण्डिकोदयः । अष्टम्यांनष्टचन्द्रेच महालक्ष्मीः शिवालये ॥ २७ ॥ योगिनी सुखदा वामे पृष्ठे वांछितदायिनी । दक्षिणेकार्य्यनाशाय संमुखेनिधनप्रदा ॥ २८ ॥ ❀ अथ वारयोगिनीविचारः ❀ प्रागुत्तराग्निनैऋत्यमपश्चिमवायुषु ॥ रव्यादिषुचवारेषु वर्जयेद्वारयोगिनीम् ॥ २९ ॥ ❀ अथ यामार्धयोगिनीविचारः ❀ यत्रोदयगता देवीततोयामार्द्धभुक्तिगा । भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥ ३० ॥ ❀ अथ राहुविचारः तत्रप्रथमंमासविचारः ❀ पूर्व्वादिदिक्षुमार्गाद्यैस्त्रिभिस्त्रिभिरितिक्रमात् ॥ मासकालस्सविज्ञेयो यात्रायां संमुखं त्यजेत् ॥ ३१ ॥ नन्दायांपश्चिमेपूर्वे भद्रायांवह्निमारुते । जयायामुत्तरेयाम्ये रिक्तास्वीशाननैर्ऋते ॥ ३२ ॥ पूर्णायांखेतिथेः कालं वर्जयेत्संमुखंसुधीः ॥ शुक्लेपूर्वादिचत्वारि कृष्णेपश्चिमतश्चतत् ॥ ३३ ॥ ❀ अथ वारराहुविचारः ❀ आदित्येचोत्तरेकालः सोमेवायव्यएवच ॥ भौमेचपश्चिमेसौम्येनैर्ऋत्येचगुरौयमे ॥ ३४ ॥ आग्नेय्यांभृगुजेज्ञेयः शनौपूर्वेक्रमाद्भवेत ॥ वारराहुः सदात्याज्यः प्रवासे वामसंमुखः ॥ ३५ ॥ ❀ अथयामार्द्धराहुविचारः ❀ इन्द्रवासवमेरुद्रे तो-

---

१ अमावास्यायाम् । २ मृत्युदात्री ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

येऽग्न्युत्तरराक्षसे । यामार्द्धमुदितोराहुर्भ्रमत्येवंदिग-ष्टके ॥ ३६ ॥ रात्रावसौप्रतीचीतो भ्रमत्येवंनसंशयः । दक्षेपृष्ठेशुभोज्ञेयो यात्रायां युद्धवादयोः ॥ ३७ ॥

❋ अथ राहुयुक्तयोगिनी---बलप्रसंशामाह ❋

पृष्ठे दक्षे योगिनी राहुयुक्ता यस्यैकोऽयं शत्रुलक्षंनि-हन्ति ॥ श्रेष्ठंसर्वेभ्योबळेभ्यस्तदेतत्संक्षेपोऽयं सर्व-सारोभ्यधायि ॥ ३८ ॥ ❋ अथ ग्रहयोगेन यात्रा-विचारः ❋ यथाहियोगादमृतायते विषं विषायते मध्वपिसर्प्पिषासमम् । तथाविहायस्वफलानिखेचराः फलंप्रयच्छन्तिहियोगसंभवम् ॥ ३९ ॥ महीभृतांयोग-वशात्फलोदयोद्विजन्मनामृक्षगुणैश्चजायते ॥ स त-स्करादेः शकुनप्रभावतो जनस्य शेषस्य मुहूर्त्तश-क्तितः ॥ ४० ॥ केन्द्रत्रिकोणगाः[1] सौम्या यात्रायांशु-भदायकाः । त्रिषडायेषुसंस्थाश्च[2] पापा अपिनिसर्गतः ॥ ४१ ॥ जीवशुक्रबुधेष्वेको यदिकेन्द्रत्रिकोणगः ॥ यात्रा प्रशस्ता विज्ञेया द्वौत्रयस्तर्हिकाकथा ॥ ४२ ॥ लग्नेऽर्केसप्तमे चन्द्रे वित्ते[3] सौम्ये प्रयातियः । लब्ध्वा-सर्वाभिलाषंच शीघ्रमायातिमन्दिरे ॥ ४३ ॥ लग्नेशः शुभयुक्दृष्टश्चन्द्रश्चोपचयस्थितैः । नर्धने[4]भवनेशुद्धे

---

१ लग्न चतुर्थसप्तम दशमाः केन्द्राः नवमपञ्चमौत्रिकोणौ

२ तृतीय–षष्ठैकादशपञ्चमस्थाः ३ द्वितीयस्थाने ४ अष्टमे

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

प्रयाणे शुभदायकाः ॥ ४४ ॥ लग्नेजीवो मृतौ[1]-
चन्द्रः शत्रुगोर्कोयदाभवेत् । तदायात्राप्रशस्तास्या-
दितिहोरागविदोमतम् ॥ ४५ ॥ वर्गोत्तमेयदाचन्द्रः सौ-
रिर्द्विश्चिकेयसंस्थितः । शत्रुगश्च महीपुत्रः प्रयाणे
शुभदायकः ॥ ४६ ॥ जन्मराशिस्तनुर्वापि यदि
लग्नगतोभवेत् । तयोरधीशौ वा लग्ने यात्रा सिद्धि-
प्रदा स्मृता ॥ ४७ ॥ जन्मराशेर्जन्मलग्नादष्टम-
स्थोयदा तनुः । तदा यात्रा न कर्त्तव्या जन्म-
तिथ्यादिकेपिच ॥ ४८ ॥ शुभोवाप्यशुभोवापि लग्ना-
दष्टमगोयदि । तदायात्रानिषिद्धैव यद्यन्योऽपिगुणो
भवेत् ॥ ४९ ॥ ❋ अथ यात्रायांव्यवस्थामाह ❋
गेहाद्गेहान्तरेयात्रासीम्नः सीमान्तरेऽपिच । वाणविक्षेप-
मात्रेवा पूर्वाचार्य्यैरुदाहृता ॥ ५० ॥ क्षौरंप्राक्त्रिदिनं
त्याज्यं क्षौरंपंचदिनंतथा । प्रयाणदिवसेतद्वत्तैलंक्षौद्रं
रतिर्वमिः ॥ ५१ ॥ नैकत्रतिष्ठेद्दशरात्रमीशः सामन्त-
संज्ञोनचसप्तरात्रम् । तदन्यलोकोनचपंचरात्रं गौण-
प्रयाणेऽपिचरीतिरेषा ॥ ५२ ॥ अशक्यकार्य्येणयदा-
विलम्बः प्रयाणकालेमनसस्त्वभीष्टम् । प्रचालयेद्देवगृहा-
दवश्यं गन्तव्यकाष्ठापरवेश्ममध्ये ॥ ५३ ॥ निमित्त-
राशिरेकतोनृणांमनस्तदैकतः । अतोयियासतांबुधर्म्मै-

१ अष्टमे २ षष्ठस्थः ३ तृतीयस्थानस्थः ।
४ गन्तव्यदिगवस्थितपरवेश्मनि ५ गन्तुमिच्छताम्

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नोविशुद्धिरिष्यते ॥ ५४ ॥ ❀ अथ शकुनाः ❀
विप्रोगजस्तुरंगश्चफलमन्नंघृतंदधि । दुग्धंनवीनवस्त्रं
च पुष्पंवाद्यंध्वजंमधु ॥ ५५ ॥ आदर्शोष्णीषरत्नानि
दीप्तवैश्वानरोपिच । ससुतस्त्री च वेश्या च छत्रं सद्वाक्य-
मेवच ॥५६॥ सधौतवस्त्रोरजकः पूर्णः कलशएवच ।
मीनेक्षुदण्डमृच्छागमद्यमीनास्त्रकन्यकाः ॥ ५७ ॥ गा-
वोमयूराश्चाषश्च शवं क्रन्दनवर्ज्जितम् । नृयानंवेदगा-
नंच गीतंमंगलकर्म्मजम् ॥ ५८ ॥ अंकुशोनकुलोमांसं
वृषभः शुक्लविग्रहः । प्रयाणेशुभदाएते तथासिंहासनं-
खलु ॥ ५९ ॥ ❀ अथापशकुनाः ❀ बन्ध्यास्थि-
तुषचर्म्माणि सर्प्पांगारेंधनानिच । वसास्त्रीपुष्पवैद्याश्च
लवणोन्मत्तदण्डिनः ॥ ६० ॥जटिलाभ्यक्तनग्नाश्च गुड़-
तक्रतृणानिच । विमुक्तकेशः पतितोऽव्यंगोविष्ठाविभर्तृ-
का ॥ ६१ ॥ कार्प्पासवमनव्याधियुक्तान्धवधिरादयः ॥
स्वगेहदहनंछिक्का वस्त्रादस्खलनन्तथा ॥ ६२ ॥ कृष्ण
धान्यार्द्दवस्त्रंचगर्भिणीकर्द्दमादिकम् । पतितोदुर्वचः
कुब्जः क्षुधार्त्तः शरटोपिच ॥ ६३ ॥ माय्यारसमरक्लीब
छुलायसमरादयः । सर्वेप्रयाणप्रारंभे दर्शने भयदाःस्मृ-
ताः ॥६४॥ गर्दभस्यरवोऋक्षोवानरः कोकिलोऽपिच ।
स्त्रीसंज्ञकाश्चयाः काश्चिद्दक्षिणेताः शुभावहाः ॥ ६५ ॥

१ विधवा २ कृकलासः ' गिर्गिट, इतिप्रसिद्धः ३ म। हषयुद्धादयः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

छुंछूका सूकरीप ल्लीकोकिलस्त्री, कपोतकी । शिवापुंमंज्ञ-
काश्चैव वामांगे शुभदायकाः ॥ ६६ आद्येऽपशकुने
स्थित्वा प्राणानेकादशंव्रजेत् । द्वितीयेषोडशप्राणान्
तृतीयेनक्कचिद्व्रजेत् ॥ ६७ ॥ आदौ संपूज्यदैवज्ञं गृ-
हदेवीं प्रणम्यच ॥ ध्यात्वादिगीशंसद्वाक्यैः सोष्णीषः
प्रवसेन्नरः ॥ ६८ ॥ * अथ नौकायानमाह * द्वि-
तीयाचतृतीयाच पंचमीत्र त्रयोदशी ॥ सप्तमीदशमी
पोतप्रयाणेसौम्यवासराः ॥ ६९ ॥ उत्तरावारुणीस्वा-
ती पित्र्ये कालविलम्बना ॥ विशाखाकृत्तिकाज्यैष्ठा
ब्राह्मयमूळेऽग्नितोभयम् ॥ ७० ॥ पूर्वात्वाष्ट्र न लाभः
स्याद्यमादर्द्रा हर्वभंगकृत् ॥ विचार्य्यैवंचकर्त्तव्या पो-
तयात्रानसंशयः ॥ ७१ ॥ * अथनृपदर्शनमाह *
मृदुक्षिप्रध्रुवर्क्षैस्तु शनिभौमदिनंविना ॥ विपर्वारिक्त-
तिथ्यादौ नृपदर्शनमुत्तमम् ॥ ७२ ॥ * अथपरदे-
शगः कदासमागमिष्यतीतिप्रश्नोत्तरमाह * विलम-
चन्द्रान्तरभागनिघ्नं यात्राविलग्नं खगुणैर्विभक्तम् ॥
आयातिराजाकिललब्धमासैर्गतोविदेशाच्छतयोजन--
स्थः ॥ ७३ ॥ * इति मैथिल श्री भानुनाथ दैव-
ज्ञविरचिते व्यवहाररत्ने यात्राप्रकरणम् ॥ ६ ॥ * ॥

---

१ छुच्छुन्दरी २ 'टिक्टिकिआ' इतिप्रसिद्धा ३ शृगाली ४ ए-
कादशश्वासंयावत्स्थित्वा ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विदेशगस्यलोकस्य स्वगृहागमनादिषु । प्रयाणोक्तैः प्रयाणः स्यात्प्रवेशोक्तैः प्रवेशकः ॥ १ ॥ ❀ अथ पुष्करण्यादिखननदिवसमाह ❀ वैशाखेश्रावणेमाघे फाल्गुनेमार्गकार्त्तिके । पौषेज्यैष्ठभवेत्सिद्ध्यै[1] वाप्यां कूपतड़ागयोः ॥ २ ॥ ❀ अथात्रतिथिविचारः ❀ एकादशीद्वितीयाच तृतीया पंचसप्तमी । प्रतिपद्दशमी श्रेष्ठा पूर्णिमाचत्रयोदशी ॥३॥ एतास्सितदलस्यैवभार्गवेन्दिज्यवासरे । दशमस्थेभृगोः पुत्रे जलखातः प्रशस्यते ॥ ४ ॥ मृदुध्रुवक्षिप्रचरेषुलग्नेझषेघटे वा मकराभिधेत्र । आप्येविधौसर्वजलाशयानां सदासमारंभमुशन्निसन्तः ❀ अथ देवताघट्टनमुहूर्त्तमाह ❀ ध्रुवमृदुलघुवर्गे वारुणे विष्णुदैवे । मरुददितिधनिष्ठे शोभनेवासरेच । त्रिदशमदने[2]जन्मैकादशे शीतरश्मौ विबुधकृतिरिहेष्टा चन्द्रतारानुकूले ॥ ६ ॥ ❀ अथदेवतड़ागादिप्रतिष्ठामाह ❀ सौम्यायनेसिते पक्षे समयेशुद्धएवहि । चरध्रुवमृदुक्षिप्रेनक्षत्रे सौम्यवासरे ॥ ७ ॥ सुक्षणे वा सुनक्षत्रे सुतिथौविष्टि[3]निर्गते । देवागमतड़ागादेः प्रतिष्ठा शुभदास्मृता ॥८॥ ❀ अथ गोचरविचारः ❀ रविस्त्रिषड्दशायस्थश्च-

---

१ खननारम्भइतिशेषः । २ मदनस्थानंषष्ठम् ३ भद्रामपहाय ४ प्रथम-सप्तमस्थानेषु ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

न्द्रः सार्द्धंस्मरेषुच । कुजोदशविहीनेषुबुधोयुग्मेऽय-
यंविना ॥ ९ ॥ देवाचार्य्यस्त्रिकोणार्यद्विसप्तस्थान-
संस्थितःशुक्रः । सप्तारिदिग्वर्ज्यं शनिर्भौमसमःशुभः
॥ १० ॥ राशिप्रवेशेसूर्य्यारौमध्येशुक्रबृहस्पती । प्रा-
न्तस्थौशशिशीतांशू फलदः सर्वदा बुधः ॥ ११ ॥
❀ अथगोचरप्रसंगात्पल्लीपतनशरटारोहणफलमाह ❀
पल्याःप्रपतनेचैव शरटस्यप्ररोहणे । फलंवक्ष्यामियत्ने
न गर्गादिमुनिभाषितम् ॥ १२ ॥ शीर्षेराज्यश्रियः
प्राप्ति र्ललाटेभयवर्द्धनम् ॥ कर्णयोर्भूषणप्राप्तिर्नेत्रयो-
र्भयदर्शनम् ॥ १३ ॥ नासिकायांचसौभाग्यमधरे सौ-
ख्यवर्द्धनम् । ग्रीवायांसुखसंपत्तिर्म्मुखेमिष्टान्नभोजनम्
॥ १४ ॥ कण्ठेनित्यप्रियप्राप्तिः स्कन्धयोर्विजयोभवेत् ।
स्तनयुग्मेचसौभाग्यंहृदयेसौख्यवर्द्धनम् ॥ १५ ॥ कु-
क्षौसत्पुत्रलाभः स्यात्पृष्ठेलाभोभवेद्ध्रुवम् । पार्श्वयोः
प्रमदालाभोबन्धुवर्गस्यदर्शनम् ॥ १६ ॥ कट्यांवस्त्र-
स्यलाभः स्यात्गुह्ये[2]मित्रसमागमः । जघनेऽर्थक्षयोनि-
त्यंगुदेरोगभयंभवेत् ॥ १७ ॥ लिंगदेशेभवेत्पीडा स्त्री
विश्लेषोपिजायते । धनवाहनसंप्राप्तिर्ज्जानुयुग्मेऽर्थसं-
ग्रहः ॥ १८ ॥ वियोगोजंघयोश्चैव पादयोर्भ्रमणंभ-
वेत् । रोहणे चोर्द्ध्ववक्रश्च अधोवक्रः प्रपातने । भवे-
द्यदिसुशीघ्रेणतत्फलंजायतेध्रुवम ॥ १९ ॥ ❀ अथा-

१ आयएकादशस्थानम् २ स्त्र्युपस्थे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्रलग्नफलम् ❀ मेषेसुखंचविज्ञेयं वृषेच पशुनाशनम् ।
मिथुनेरोगसंप्राप्तिः कर्कैकलहमेवच ॥२०॥ सिंहेपुत्रस्यलाभश्च कन्यालग्ने धनक्षयः । तुलवृश्चिककोदण्डेपुत्रलाभोभवेद्ध्रुवम् ॥२१॥ मकरे धनलाभश्च कुंभे हानिंविनिर्दिशेत् । मीनेचशोकसन्तापःपल्लीप्रपतनेध्रुवम् ॥ २२ ॥ पल्लीप्रपतनेयत्तु फलंप्रोक्तं विचक्षणैः । तदेवशरटारोहे फलं वाच्यं शुभाशुभम् ॥ २३ ॥ ❀ अथ रोगोत्पत्तौक्लेशदिवसविचारः ❀ अश्विन्यांकृत्तिकायांच मूलर्क्षेऽपितथैवच । रोगोत्पत्तिर्भवेद्यस्य नवाहान्मोक्षमाप्नुयात् ॥२४॥ भरण्यामुत्तरेभाद्रे रोहिण्यामदितिद्वये ॥ सप्तरात्रेणमुक्तिःस्याद्व्याधेरित्याहनारदः ॥२५॥ सौम्ये वैश्वे तु मासेन विंशत्य[1] चे मघासुच । विशाखायांधनिष्ठायां हस्तेपक्षान्न संशयः ॥२६॥ वारुणश्रुतिचित्रासु द्वादशाहेनमुक्तिदः । मासेनोत्तरफल्गुन्यां रोगमुक्तिर्विधीयते ॥२७॥ रेवत्यांमित्रभेचैव कृच्छ्राज्जीवतिमानवः । त्रिपूर्वाहिशिवस्वाती ज्येष्ठासुनहिजीवति ॥२८॥ ❀अथ निश्चितनिधनकारकयोगाः ❀ उरगशतभिषार्द्रास्वातिशक्रत्रिपूर्वा भरणिरविजभौमे चार्कवारे नवम्याम् । प्रथमतिथिचतुर्थीद्वादशीभूतषष्ठी शिवहरिगुरुयोगाद्रोगिणां कालएषः ॥२९॥ सर्प्पप्रचेतश्शिवभेन्नवमीशनिसंग-

---

१ दिनानामिशेषः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मात् । योगः शिवः समाख्यातो रोगिणांकालदोमतः ॥३०॥ स्वातीशक्रत्रिपूर्वासु चतुर्थीप्रतिपद्यदि ॥ भौमेभीतिकरोयोगो हरिन्नाशायरोगिणाम् ॥३१॥ भरण्यांपंचमीषष्ठी द्वादशी रविवासरे । ज्ञेयोगुरुर्म्महायोगो रोगिणांकालदोमतः ॥३२॥ सप्ताहंवारदोषेणद्विगुणन्तिथिवारतः । तिथिनक्षत्रतोमासं[1] त्रिभिः कालो न संशयः ॥३३॥ आधानेजन्मनक्षत्र प्रत्यरौ निधनेऽपिवा । यस्यव्याधिस्समागच्छेत् क्लेशाय निधनाय च ॥३४॥ ❋ अथोत्पातरूपानिष्टकालमाह ❋ दक्षिणस्यांदिशिच्छायामात्मनोयः प्रपश्यति । छायाद्वयंयदा भूमौपश्यत्येवंशिरोद्वयम् ॥३५॥ आत्मच्छायाशिरोहीना सूर्य्याचन्द्रमसोर्द्वयम । उभयोश्चैवयच्छिद्रं प्रपश्यत्युदयास्तयोः ॥३६॥ स्वप्नेप्रेतपरिष्वंगं तद्दर्शनमथापिवा । गृहेयस्याशनेः पातोमहोल्कापतनन्तथा ॥३७॥ मत्स्यकच्छपपातश्च निशीथेचापदर्शनम् । अरुन्धतीनदृश्याचशीर्षेगृध्रादयोऽपिवा॥३८॥ एतान्यनिष्टचिह्नानियदाभूयोभवन्तिच । गच्छत्वसौत्वरांकृत्वा गंगांनरकतारिणीम् ॥३७॥ मृत्युस्तस्यदशाहेन सप्तरात्रेणकस्यचित् । पंचाहेकस्यचिद्ज्ञेयः कस्यचित्पक्षगोचरः ॥४०॥ यदिदेवद्विजातीनां पूजनादिकमाच-

---

१ व्याप्यव्याधिस्थितिविशेषः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

रेत् । तथापिदुर्लंभंज्ञयमायुस्तस्यमनीषिभिः ॥ ४१ ॥
❀ अथ भैषज्यारम्भदिवसमाह ❀ मूलानलानिलदितीन्द्रकरेज्य चन्द्राःपौष्णाश्विनीद्रविणकेशवमित्रचित्राः। भैषज्यभक्षणविधौनियतंनराणां निघ्नन्त्यरिष्टशतमप्यचिरात्तनुस्थम् ॥४२॥ द्व्यंगोदयेगुरुबुधेन्दुसितेषुतेषां वाग्रवेश्वसुविधौसुतिथौसुयोगे । जन्मर्क्षविष्टिरहितंत्व पहृत्यरोगान्कन्दर्पतुल्यवपुरुषंपुरुषंकरोति ॥ ४३ ॥
❀ अथ वस्तिविशोधनविरेचनव्रणादिवेधानां विधिमाह ❀ पुष्योहस्तस्तथाज्येष्ठा विशाखाचोत्तराश्विनी। शुभान्येतानिधिष्ण्यानिवेधेवस्तिविरेचने ॥ ४४ ॥
❀ अथ रोगविमुक्तस्नानदिवसमाह ❀ दशमीनवमी चैव प्रतिपच्चत्रयोदशी । द्वितीयाचविशेषेण कृच्छ्रस्नाने विवर्जयेत् ॥ ४५ ॥ हस्तेपुष्यनथाशक्रसौम्यार्द्रासु हरित्रये । स्नातुरोगविनिर्म्मुक्तः पुनर्व्याधिर्न्नबाधते ॥४६॥ निषिद्धेन्दौव्यतीपाते भद्रायां वीन्दुभार्गवे । रिक्ते तिथौ चरे लग्नेस्नानं रोगविमुक्तितः ॥ ४७ ॥
❀ अथ व्रणमुक्तस्नानदिवसमाह ❀ चन्द्राशुद्धेव्यतीपातेभौमार्कशनिवासरे । व्रणमुक्तोव्याधिमुक्तः सदास्नानंसमाचरेत ॥४८॥ ❀ अथ निषिद्धदिनाद्युत्पन्नरोगप्रतीकारमाह ❀ ताराचन्द्रानुकूलेहि यदा रोगैः प्रपीड्यते । तदाद्वित्रिदिनंदुःखंनमृत्युर्म्मृत्युभेऽपि

१ द्वितीयलग्नोदये

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

च ॥४९॥ धर्म्मैककर्मानुरक्तोयः सत्यवाक् पथ्यभक्षकः । स्वल्पनिद्रस्स्वल्परतिर्दीर्घजीवीसएवहि ॥५०॥ ❋ अथ दीर्घजीविप्रसंगात्कविवंश्यकथनम् ❋ यथाद्यारामधरामरोभूत्त्वौआलवंशांबुजचित्रभानुः। सदैवधर्म्मप्रतिपालनार्थं शास्त्रावलोकी खलुदीर्घजीवी ॥ ५१ ॥ पुत्रस्तस्यमहामहेतिसहितोपाध्यायपूर्वः कृतीश्रीमन्नन्दनसंज्ञकः समभवत्तातायुरुद्यद्यशाः[1] । वक्तावेदगुरोः समरसुनिपुणोविद्याविवादोद्यमे नेपालक्षितिपालदत्तमिथिलाभूखण्डलाखण्डलः[2] ॥५२॥ तज्जाताः सप्त सप्तर्षिसमाः स्वस्वगुणेनच । नानाविद्यानिधानास्तेनपरद्रोहचिन्तकाः ॥५३॥ एकस्तेषुसरस्वतीवरबलः श्रीभानुनाथाभिधश्चक्रेचक्रधरं प्रणम्य शिरसा भूयः प्रसन्नाननम् ॥ श्रीयुक्तंव्यवहाररत्नमखिलं सत्षष्ठिवर्षाधिकः शा०केवह्निनवाद्रिभूपरिमिते मासेतपस्येशुभे ॥ ५४ ॥ मर्य्यादानेकदेशस्य स्वग्रन्थे स्थापिता परैः । मयास्वदेशमात्रस्यव्यवहारः प्रदर्शितः ॥ ५५ ॥ अनुष्टुपैव प्रकृतंसमस्तंछन्दोभिरन्यैः क्वचिदात्मबुध्या । यत्तद्दटोरर्थंसुखार्थमेवंध्रुवंविजानातुसुहृन्मनीषी ॥ ५६ ॥ ना-

---

१ तातस्यायुरिवायुर्यस्यसः । दीर्घजीवीत्यर्थः ।

२ भूखण्डंमहत्तरांग्रामाभिधंलातिगृह्णातीतितथाविधस्सचासावाखण्डलश्चेतिसमासः स्वग्रामाधिपइत्यर्थः ।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

धीतंशब्दशास्त्रं नवरसरुचिरं काव्यवर्गादिकंवा कोषो-
वालंकृतिर्वास्मृतिरपिसकलातन्त्रविद्यापिनैव । वाणी-
मात्रप्रसादादविकलमनसाशास्त्रसारो निरुक्तः प्रध्वस्तं
तत्रयत्स्यात्[1]खलजनकुधियासज्जनैः क्षम्यतान्तत् ॥५७॥
इतिश्रीआलकुलानन्दनचंदनन्दनोपाध्यायसुतमैथिल-
श्रीभानुनाथदैवज्ञविरचिते व्यवहाररत्ने गृहागम-
नादिप्रकरणम् ॥७॥ ❀ ॥ शुभमस्तु ❀ ॥
समाप्तश्चायंग्रन्थः ॥ ❀ ॥

---

१ स्यादितिसम्भावनायांलिङ् । तेनात्रसम्भावितेप्रध्वंसे (स्खलने) खलजनकुधीरेवहेतुर्नास्मद्बुद्धिदोष इति कवेर्लोकोक्तिचातुरीचणत्वमावेद्यते ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# अथ परिशिष्टम् ।

नत्वादिनमणिमरुणं करुणावरुणालयं रमारमणम् ॥
लघुबोधं शिशुरमणं कुर्वे व्यवहाररत्नपरिशिष्टम् ॥१॥

अथादौदिननामानि ॥ आदित्यश्चन्द्रमाभौमो-बुधश्चाऽथबृहस्पतिः । शुक्रः शनैश्चरश्चैते वासराः परिकीर्तिताः ॥१॥ ❋ अथ तिथिनामानि ❋ प्रतिपच्च द्वितीयाच्च तृतीयातदनन्तरम् । चतुर्थी पञ्चमी षष्ठी सप्तमीचाष्टमीततः ॥ नवमी दशमीचैकादशीच द्वादशीततः । त्रयोदशीततोज्ञेया ततः प्रोक्ता चतुर्द्दशी । पूर्णिमा शुक्लपक्षेस्यात्कृष्णपक्षेत्वमा स्मृता ॥ २ ॥ ❋ अथ नक्षत्रनामानि ❋ अश्विनी भरणीचैव कृत्तिकारोहिणी तथा । मृगशीर्षस्तथाचार्द्रा तथाप्रोक्तः पुनर्वसू[1] ॥ पुष्योऽश्लेषामघापूर्वफल्गुन्युत्तरफल्गुनी । हस्त श्चित्रातथा स्वाती विशाखाचानुराधिका[2] ॥ ज्येष्ठा मूलं तथा प्रोक्ता पूर्वाषाढा तथोत्तरा । श्रवणा च धनिष्ठा च तथा शतभिषा[3] परा ॥ पूर्वभाद्रोत्तराभाद्रे रेवत्येतानिभानि च ॥ ❋ अथ न-

१ युग्मताराभिधानाद्द्विवचनान्तम् 'पुनर्वसू चद्वेतारेयुग्मचरे, इतिहि-ज्यौतिषिकाःप्राहुः । २ अनुराधाएवानुराधिका । स्वार्थेकः । ३ शतभिषक् इतिपाठान्तरम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्षत्रस्वरूपम् ❀ अश्वादिरूपं तुरगास्ययोनिक्षुरेणए-णास्यमणिर्गृहञ्च । पृषत्कचक्रे भवनञ्चमञ्चकाः श-य्याकरोमौक्तिकविद्रुमञ्च ॥ तोरणं बलिनिभञ्चकुंड-लं सिंहपुच्छगजदन्तमञ्चकाः । त्र्यग्निवत्रिचरणाभ मर्द्दलौवृत्तमंचकयमाभमर्दलाः ॥ २ ॥ ❀ अथ योगनामानि ❀ विष्कम्भ प्रीतिरायुष्मान् सौभाग्यं शोभनस्तथा । अतिगण्डः सुकर्मा च धृतिः शूलं तथैवच॥१॥ गण्डोवृद्धिर्ध्रुवश्चैवव्याघातोहर्षणस्तथा । वज्रंसिद्धिर्व्यतीपातोवरीयान्परिघः शिवः॥२॥ सिद्धिः साध्यः शुभः शुक्लोब्रह्म ऐन्द्रश्चवैधृतिः ॥ ❀ अथैषां फलम् ❀ नामसाम्यफलायोगास्तेषु केषु च निन्दिताः ॥३॥ काश्चित्काश्चिच्च घटिकास्तास्त्याज्याःशुभकर्मसु परिघेऽर्धं व्यतीपातेवैधृतौसकलंत्यजेत् ॥ ४ ॥ विष्क-म्भेघटिकास्तिस्रः पञ्च शूलेप्रकीर्त्तिताः॥गण्डातिगण्ड-योः सप्त नवव्याघातवज्रयोः ॥५॥ ❀ अथ (चल) करण नामानि ❀ बवाह्वयं बालवकौलकाख्ये ततोभवेत्तैति-लनामधेयम् । गराभिधानं वणिजञ्चविष्टिरित्याहुरा-र्य्याः करणानि सप्त ॥१ ॥ ❀अथ स्थिरकरणानि❀ चतुर्द्दशीयाशशिनाप्रहीणातस्यार्द्धभागेशकुनिर्द्वितीये।

---

१ एतच्चसमान्यतोनक्षत्रमात्रस्य, तस्यैवविवरणन्तुरगास्येत्यादि-नाऽग्रेतनेन ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दर्शार्द्धयोस्तश्चतुरंघ्रिनागौकिंस्तुघ्नमाद्येप्रतिपद्दलेच ॥ १ ॥ * अथ राशिनामानि * मेष-वृष-मिथुन-कर्कट-सिंहाः कन्या तुलाथवृश्चिकभम् । धनुरथमकरः कुम्भोमीन इति च राशिनामानि ॥ १ ॥ * अथैषांपर्यायकथनम् * क्रिय-तावुरि—जितुम-कुलीर-लेय-पाथोन-जूक-कौर्पाख्याः । तौक्षिक-आकोकेरो-हृद्रोगश्चान्त्यभंचेत्थम् ॥ * अथैषांवर्णभेदाः * अरुण-सित-हरित-पाटल[1]-पाण्डुर-चित्राः सितेतर-पिशंगौ ॥ पिंगल-कर्बुर-बभ्रु-स्ववर्णरुचयोयथासंख्यम् ॥ * अथैषांक्रूरसौम्यादिविवेकः * क्रूरोऽथसौम्यः पुरुषोंऽगनाचओजोऽथयुग्मं विषमः समश्च ॥ चरस्थिरद्व्यात्मकनामधेयामेषादयोऽमीक्रमशः प्रदिष्टाः ॥ * अथैषांस्वामिनः * मेषवृश्चिकयोर्भौमोबुधोमिथुनकन्ययोः । तुलावृषभयोःशुक्रः कर्कटस्यतु चंद्रमाः । सिंहस्याधिपतिः सूर्यः शनिर्म्मकरकुम्भयोः । धनुर्मीनभयोर्जीवश्चैतेराशीश्वराः स्मृताः ॥ १ ॥ * अथैषां मानम् * अष्टेन्दुपक्षाः[२१८] शशिबाणपक्षा[२५१] गुणोभूमा[३०१] गुण-

---

१ पाटलस्तत्पुष्पवर्णईषत्कृष्णरक्त इत्यर्थः । पाण्डुरोधूम्रपाण्डुरीषच्छुक्लः । सितेतरः कृष्णः । पिशङ्गः कद्रुपिंगलः सुवर्णवर्णइति यावत् । पिंगलः पीतः । कर्बुरः श्वेतरक्तः । शुक्लकपिलव्यामिश्रवर्णइत्येके । बभ्रुः नकुलवर्णसदृशः । स्ववर्णरुचय आत्मवर्णाः स्वच्छाइत्यर्थः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वेदे[३४३]रामाः । शैला[३४७]ब्धिरामा वसु[३३८]रामरामाः क्रमोत्क्रमान्मेषतुलादिमानम् ॥ १ ॥ ❋ अथ प्रत्यंशेभुक्तशशिमानम् ❋ भुक्तिर्मेषेझषेसप्त वृषे कुम्भेपलाष्टकम् । मिथुने मकरे पङ्क्तिः पलान्येकादशापरे ॥ २ ॥ अंगुष्ठे रसरुद्रैके तर्जन्यां हयभानुदिक् । मध्ये ताम्बूलवस्वग्निनन्दवेदमनुक्रमात् ॥ ३ ॥ दिग्वाणपंचदश्यं च कनिष्ठायां भवेदिदम् ॥ ४ ॥ ❋ अथ मासनामानि ❋ मासश्चैत्रोऽथवैशाखोज्येष्ठआषाढसंज्ञकः । ततस्तुश्रावणोभाद्रपदआश्विनसंज्ञकः ! कार्त्तिकोमार्गशीर्षश्चपौषोमाघोऽथफाल्गुनः ॥ ❋ अथर्त्तुनामानि ❋ वसन्तोग्रीष्मसंज्ञश्चततोवर्षाततःशरत् । हेमन्तः शिशिरश्चैव षड़ेते ऋतवः स्मृताः ॥ ❋ अथर्त्तुलक्षणानि ❋ मीनमेषगतेसूर्ये वसन्तः परिकीर्त्तितः । वृषभेमिथुनेग्रीष्मोवर्षासिंहेऽथकर्कटे ॥ कन्यायाञ्च तुलायाञ्च शरदृतुरुदाहृतः । हेमन्तो वृश्चिकद्वन्द्वे शिशिरोमृगकुम्भयोः ॥ २ ॥ इति ॥ अन्यत्र तु 'मधुमाधवौवसन्त' इत्येवंचान्द्रक्रमेणैवर्त्तुज्ञानमुक्तम् ॥

# अथ शत[1]पदचक्रम् ।

कृत्तिकाद्याः २८

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| अ | व | क | ह | ड | मो | मे | मु | मि | म |
| इ | वि | कि | हि | डि | टो | टे | टु | टि | ट |
| उ | वु | कु घ ङ छ | हु | डु | पो | पे | पु ष ण ठ | पि | प |
| ए | वे | के | हे | डे | रो | रे | रु | रि | र |
| ओ | वो | को | हो | डो | तो | ते | तु | ति | त |
| ल | लि | लु | ले | लो | खो | जो | भो | यो | नो |
| च | चि | चु | चे | चो | खे | जे | भे | ये | ने |
| द | दि | दु थ झ ञ | दे | दो | खु | जु | भु ध फ ढ | यु | नु |
| स | स | सु | से | सो | खि | जि | भि | यि | नि |
| ग | गि | गु | गे | गो | ख | ज | भ | य | न |

१ अथ-चक्रंशपदंवक्ष्येऋक्षांशाक्षरसम्भवम् । नामादिवर्णतोज्ञेयाऋक्षराश्यंशकास्तथा ॥ १ ॥ तिर्यगूर्द्धगतारेखारुद्रसंख्यालिखेद्बुधः । जायतेकोष्ठकानान्तुशतमेकन्नसंशयः ॥ २ ॥ तस्यावकहड़ादीनिरुद्रादिविदिशिक्रमात् । पञ्चपञ्चक्रमेणैवविंशद्वर्णान्नियोजयेत् ॥ ३ ॥ पञ्चस्वरसमायोगादेकैकंपञ्चधाकुरु । कुर्यात् कुपुभुदुस्थानेत्रीणित्रिण्यक्षराणिच ॥ ४ ॥ कुघङछभवेत्स्तम्भे रौद्रेत्वीशानगोचरे । पुषणठभवेत्स्तम्भेहस्तेआग्नेयसंज्ञके ॥५॥ ऋक्षेपूर्वा भुधाफाढाकुथझञोत्तरानिले । एवंस्तम्भचतुष्कञ्चज्ञातव्यं स्वरवेदिभिः ॥ ६ ॥ धिष्ण्यानिकृत्तिकादीनि प्रत्येकं चतुक्षरैः । साभिजित्यंशकास्तस्यशतैकंद्वादशाधिकम् ॥ ७ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

❋ अथ जन्मनक्षत्रज्ञानार्थमेषामश्विन्यादिक्रमेण न्यासः❋चु चे चो ल अश्विनी। लि लु ले लो भरणी अ इउ ए कृत्तिका। ओ व वि वु रोहिणी। वे वो क कि मृगशिरा॥ कु घ ङ छ आर्द्रा। के को ह हि पुनर्वसू। हु हे हो ड पुष्यः। डि डु डे डो ऽश्लेषा। म मि मु मे मघा। मो ट टि टु पूर्वफल्गुनी। टे टो प पि उत्तर फल्गुनी। पु ष ण ठ हस्तः॥ पे पो र रि चित्रा। रु रे रो त स्वाती। ति तु ते तो विशाखा।न नि नु ने अनुराधा। नो य यि यु ज्येष्ठा। ये यो भ भि मूलम्। भु ध फ ढ पूर्वाषाढः(ढा)। भे भो ज जि उत्तराषाढः(ढा) जु जे जो ख अभिजित्[1]। खि खु खे खो श्रवणा। ग गि गु गे धनिष्ठा। गो स सि सु शतभिषा। से सो द दि पूर्वभाद्रः। दु थ झ ञ उत्तरभाद्रः। दे दो च चि रेवती॥ २८॥ इति जन्मनक्षत्रज्ञानम्[2]॥

---

१ अभिजिल्लक्षमुक्तं मुहूर्त्तचिन्तामणौ। वैश्वप्रात्याङ्घ्रिश्रुतितिथिभागतोऽभिजित्स्यादिति॥ वैश्वमुत्तराषाढः। तस्यान्तिमचरणं श्रवणस्यतिथिभागः पञ्चदशोंऽशोऽभिजिदित्युच्यतइतितदर्थः।

२ अत्र नक्षत्रनामसु यथाव्यवहारं प्रकृतिभूताएवसमस्तानिर्दिष्टा बोध्याः॥ अत्र नमोक्ताङञणा वर्णा नामादौसन्ति ते नहि। चेद्भवन्ति तदा ज्ञेया ग ज डास्तेयथाक्रमम्॥१॥ इतिस्वरोदयोक्त्या ङञणवर्णानांगजडवर्णैः साम्यकथनान् ङकरादिनक्षत्रचरणोत्पन्नशिशूनां गकाराद्यक्षरं नाम धार्यमितिकेषांचिद्भ्रम एव तथासति

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आर्द्रातृतीयचरणेलब्धजन्मनोधनिष्ठाप्रथमचरणजत्वभ्रमप्रसक्तेः। एवमन्यत्रापिबोध्यम्। उक्तश्लोकस्तुवर्णस्वरज्ञानविषयः। तस्माच्चन्द्रताराविज्ञानाय तन्नक्षत्रीयैः कैश्चिदपिव्यवहृतनामाद्यक्षरैर्वर्णैर्यथाशास्त्रंनामधार्यम्। शास्त्रन्तु यथाप्रोक्तंमहाभाष्यकृता! "दशम्युत्तरकालंपुत्रस्यजातस्यनामविदध्याद्घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरि प्रतिष्ठितं तद्धिप्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरंवानाम कृतं कुर्यान्न तद्धितमिति" याज्ञिकवचनम्। अत्र व्यवहारोऽप्यपेक्षणीयो यथाकुलाचारम्॥ संयुक्ताक्षरेस्वरोदय एवोक्तम्। "यदिनाम्निभवेद्वर्णः संयुक्ताक्षरलक्षणः। ग्राह्यस्तदादिमोवर्ण इत्युक्तं ब्रह्मयामले"॥ इति॥ येतुवर्णा "घादयो द्वादश" शतपदचक्रेस्तम्भचतुष्कस्थाः आद्यस्वरमात्रयुताउक्तास्ते अनुक्तैरपिशिष्टैः स्वरचतुष्टयैर्युताग्राह्याः इयांस्त्वत्रविशेषः। षखयोःपृथक्श्रुतेः षकारमपहाय बकारोवकारेण, शकार श्चसकारेण, तुल्ययोगक्षेमोमन्तव्यः। यथोक्तंस्वरोदयएव "बवौशसौषखौचैवङ्यावितिपरस्परमिति" अस्यसवर्णावितिशेषः। एवंस्वरोदये पञ्चस्वरसमायोगादेकैकं पञ्चधा कुरु" इतियच्छतपदचक्रोद्धारउक्तंतत्र "मातृकायांपुराप्रोक्ताः स्वराः षोड़शसंख्यकाः। तेषां द्वावन्तिमौत्याज्यौचत्वारश्चनपुंसकाः। शेषाद्दशस्वरास्तेषु स्यादेकैकोद्विकेद्विके। ज्ञेयाअतः स्वराद्यास्तेस्वराः पञ्चस्वरोदय" इतिमातृकास्वरचक्रोक्त्याऽकारादिपञ्चस्वरेणाकारादीनां साम्यकथनाद इ उ ए ओ इत्येतैरा ई ऊ ऐ औ इत्येतेऽपिग्राह्या ऋकारादयश्चत्वारस्तुनपुंसकाइत्युक्त्या नामादिस्थिताअपि प्रथमोपस्थितऽस्वरेणैव समानयोगक्षेमाः कार्या यथा "कृष्णलाल" नाम्निऋकारोऽविवक्षितोऽकारएवच विवक्षित इत्येवम्मन्तव्यम् तथाचायं मृगशिरसि तृतीयचरणावच्छेदेन लब्धजन्मैवमृद्धिनाथश्चित्रातृतीयचरण इतिव्यवहर्तव्यमिति होराविदां सम्प्रदायः।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

❀ अथ जन्मर्क्षतोराशिविचारे चन्द्रावस्थितिमाह ❀

अश्विनी भरणी कृत्तिका पादमेकं मेषः ॥ १ ॥ कृत्तिकानां त्रयः पादा रोहिणीमृगशिरोऽर्द्धं वृषः ॥२॥ मृगशिरोऽर्द्धमार्द्रा पुनर्वसूपादत्रयं मिथुनः ॥ ३ ॥ पुनर्वसूपादमेकं पुष्योऽश्लेषान्ते कर्कः ॥ ४ ॥ मघा पूर्वफल्गुन्युत्तरापादमेकं सिंहः ॥ ५ ॥ उत्तराणां त्रयः पादाहस्तश्चित्रार्द्धं कन्या ॥ ६ ॥ चित्रार्द्धं स्वाती विशाखापादत्रयं तुला ॥ ७ ॥ विशाखापादमेकमनुराधाज्येष्ठान्ते वृश्चिकः ॥ ८ ॥ मूलं पूर्वाषाढोत्तराषाढपादमेकंधनुः ॥९॥ उत्तराणांत्रयःपादाःश्रवणाधनिष्ठा मकरः १० धनिष्ठार्द्धं शतभिषक्पूर्वभाद्रपादत्रयं कुम्भः ॥ ११ ॥ पूर्वभाद्रपादमेकमुत्तरभाद्ररेवत्यन्ते मीनः ॥१२॥

अथात्रश्लोकाः ॥ अश्विन्यासहभणीकृत्तिकापादःकीर्त्तितोमेषः । वृषभःकृत्तिकाशेषंरोहिण्यर्धश्चमृगशिरसः ॥ १ ॥ मृगशिरसोऽर्धंचार्द्रापुनर्वस्वोस्त्रिपादंमिथुनम् । पादःपुनर्वस्वोरन्त्यः पुष्योऽश्लेषाचकर्कटकः ॥२॥ सिंहोऽथमघापूर्वफल्गुनीपाद उत्तरायाः । तच्छेषंहस्तश्चित्रार्धंकन्यकाख्यः स्यात् ॥ ३ ॥ तौलिनिचित्रार्धस्वातीविशाखायाश्चपादत्रयम् । अलिनिविशाखापादस्तथानुराधान्विताज्येष्ठा ॥ ४ ॥ मूलंपूर्वाषाढाप्रथमश्चाप्युत्तरांशकोधन्वी । मकरस्तत्परिशेषंश्रवणाचार्द्धंन्ध-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निष्ठायाः ॥ ५ ॥ कुम्भोऽथधनिष्ठार्धंशतभिषापौर्वभाद्रपदत्रयम् । भाद्रपदायाःशेषस्तथोत्तरारेवतीमीनः ॥ ६॥

❀ अथ जन्मनामराश्योःकार्यभेदेननिर्णयः ❀ देशेग्रामेगृहेयुद्धेसेवायांव्यवहारके । नामराशेःप्रधानत्वंजन्मराशेरतःपरम् ❀ अथ दिक्शूलम् ❀ तत्रतावद्दिनदिक्शूलम् ॥ रविशुक्रारराह्वार्किचन्द्रज्ञगुरुवासरे । पूर्वादिषुगमःशस्तः पश्चिमादिषु मृत्युदः (वर्जितः) ❀ अथ तच्छान्तिः ❀ सूर्यवारेघृतंप्राश्यसोमवारेपयस्तथा । गुडमंगारकेवारेबुधवारे तिलानपि । गुरुवारे दधि प्राश्य शुक्रवारे यवानपि । माषान्भुक्त्वाशनेर्वारेगच्छन्शूले न दोषभाक् ❀अपरञ्च ❀ ताम्बूलंचन्दनंमृच्चपुष्पंदधिघृतंतिलाः । वारशूलहराण्यर्कादिदानाद्धारणतोऽदनात् ❀ अथ नक्षत्रदिक्शूलम् ❀ ॥ मूलंज्येष्ठां प्राचि श्रुत्यादिषट्कंयाम्यां, पुष्यं रोहिणींचप्रतीच्याम् । त्यक्त्वोदीच्यामर्यमर्क्षंच हस्तं गच्छेत्प्राज्ञोलग्नयोगादिशुद्धौ ॥ केचित् पूर्वां फल्गुनीमूलभं चोदीच्यां याम्यामश्विनीश्चत्यजन्ति ॥ ❀ अथ सर्वदिग्द्वारिनक्षत्राणि❀

---

१ आरःकुजः । राहुपदेनबुधःस्वगृहकन्यास्वामित्वात् । यथाहुः "कन्याराहोर्गृहंयस्मात्तस्माद्राहोर्बुधंविदुः । तेनैशानदिग्गन्तुर्बुधवारोनिषिध्यते" इति । अत्र "नवारदोषाःप्रभवन्ति रात्रौ देवेज्य दैत्येज्यदिवाकराणाम् । दिवा शशाङ्कार्कजभूसुतानां सर्वत्रनिन्द्यो बुधवारयोगः ॥ इति वदन्ति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सर्वदिग्गमनेशस्तः पुष्योश्विःश्रवणोमृगः । सर्वसिद्धिकरः पुष्योविद्यायाञ्चगुरुर्यथा ॥ ❀ अथ तिथिवारयोगेऽमृतयोगः ❀ रविचन्द्रमसोःपूर्णा कुजे भद्रागुरौ जया । बुधमन्दगतानन्दा भृगौरिक्तामृताःस्मृताः ॥ ❀ अथामृतसिद्धियोगाः ❀ आदित्यहस्तौगुरुपुष्ययोगा बुधानुराधा शनिरोहिणीच । सोमेचसौम्यं भृगुरेवतीच भौमाश्विनीचामृतसिद्धियोगाः ❀ अथास्यापवादमाह ❀ गृहप्रवेशे यात्रायां विवाहेचयथाक्रमं । भौमाश्विनीं शनौ ब्राह्मं गुरौ पुष्यं विवर्जयेत् ॥ ❀ अथानन्दयोगः ❀ अश्विनी सूर्यवारेच सोमेमृगशिरस्तथा । अश्लेषाभौमवारेच बुधेहस्तः प्रकीर्त्तितः ॥ अनुराधागुरोर्वारे विश्वेदेवास्तुभार्गवे । शतभिषाशने-

---

२ चात्पूर्वभाद्रपदांविशिष्यत्यजन्ति । अन्येषुतुगमन मनुमन्यते । वस्तुतस्तु । धनिष्ठादौ शतभिषान्ते मध्येचोत्तरपूर्वयोः । पञ्चपञ्चघटीस्त्याज्यारेवतीशकलांत्यजेत् ॥ इति प्रामाणिकवचनाच्छ्रवणस्य प्रशस्तत्वाभिधानाच्च धनिष्ठादिपञ्चकमेव तृणकाष्ठच्छेदनेऽपिनिषिद्धं तथाच धनिष्ठादिपञ्चकमुपक्रम्य " नछिन्द्यात्तृणकाष्ठानिनगच्छेद्दक्षिणांदिशम् । इत्याहुः ॥

१ पुष्यन्त्यस्मिन्नर्था इतिहिपुष्यः । यथाहुः । नयोगयोगंनचलग्रलग्नंनतारकाचंद्रबलंगुरोश्च । नयोगिनीकालविचारराहु रेतानिविघ्नानिनिहन्तिपुष्यः ॥ सिंहोयंथासर्वचतुष्पदानां तथैवपुष्यो बलवानुडूनां । चन्द्रेविरुद्धेऽप्यथगोचरेवासर्वाणिकार्याणिकृतानि पुष्ये ॥ इति ॥ कृतानि-निष्पन्नान्येवेतिमयन्तदशानि ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वारेआनन्दाख्याः प्रकीर्त्तिताः ❋ अथविषयोगः ❋
हस्तार्केषुचपञ्चम्यां षष्ठींश्रवणसोमयोः । भौमाश्विनीश्च-
सप्तम्यामनुराधायांबुधाष्टमी ॥ नवमीगुरुपुष्येच दशमी
भृगुरेवती । एकादशीशनिरोहिण्यां विषयोगाः प्रकी-
र्त्तिताः ॥ ❋ अथ मृत्युयोगः ❋ आदित्यभौमयोर्न-
न्दाभद्राशुक्रशशाङ्कयोः । जयासौम्येगुरौरिक्ताशनौपूर्णा
च मृत्युदा ॥ ❋ अथ सिद्धिविरुद्धौ ❋ आदित्ये
चाष्टमीहस्तौ अश्विनीचोत्तरात्रयम् । मूलपुष्यौधनिष्ठा
च सिद्धियोगाः प्रकीर्त्तिताः ॥१॥ सूर्योविशाखाभरणी
द्वादशीच चतुर्द्दशी । मघानुराधाज्येष्ठाचविरुद्धाः सर्व-
कर्मसु ॥२॥ सोमेतुनवमीपुष्यः श्रवणारोहिणीमृगः ।
एतानिदशमीचैवसिद्धियोगाः प्रकीर्त्तिताः ॥३॥ चन्द्रे
चित्रोत्तराषाढापूर्वाषाढाविशाखकौ । एकादश्याञ्च द्वा-
दश्यां सर्वकर्मसुवर्जयेत् ॥४॥ भौमाष्टमीतृतीय चतथा
चैवत्रयोदशी । मूलाश्विनीमृगाश्लेषासिद्धाउत्तरभाद्र-
भाः ॥५॥ कुजेचार्द्राशतभिषाप्रतिपत्पूर्वभाद्रभाः । वारुणं
वैश्वदेवश्च दशमीञ्च विवर्जयेत् ।६। बुधवारेद्वितीयाच
सप्तमी द्वादशीतथा । मृगानुराधा पुष्यश्च सिद्धाः कृत्तिक
रोहिणी ॥७॥ बुधेधनिष्ठाभरणी अश्विनीमूलरेवती ।
तृतीया नवमीचैव वर्जनीयासदाबुधैः ॥ ८ ॥ गुरौपुष्ये
विशाखा च मैत्रः पूषापुनर्वसू । सिद्धियोगाः पूर्णिमा

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

च दशमी पञ्चमीतिथिः ॥९॥ जीवेशतभिषाद्रीच कृत्तिकोत्तरफल्गुनी । विधिर्मृगाष्टमी षष्ठी चतुर्थीञ्च विवर्जयेत् ॥ १० ॥ शुक्रचित्रार्यमापूषाश्रवणापूर्वफल्गुनी । सिद्धिश्चैकाशीषष्ठीप्रतिपच्चत्रयोदशी ॥११॥ भार्गवेरोहिणीस्वातीज्येष्ठाश्लेषामघास्तथा । द्वितीया दशमीचापिवर्जनीयासदाबुधैः ॥१२॥ शनौ च रोहिणी स्वाती शतभिषा च पुनर्वसू । सिद्धियोगोनवम्याञ्च चतुर्थी च चतुर्द्दशी ॥ १३ ॥ शनौहस्तोत्तराषाढा चित्राचोत्तरफल्गुनी । रेवतीचसदावर्ज्यातिथिः षष्ठी च सप्तमी ॥१४॥ ❋ अथ तिथिवारयोगेनिषिद्धफलम् ❋ द्वादश्यर्कयुताभवेन्नशुभदासोमेनचैकादशीभौमेनापि-युतातथैवदशमीनेष्टातृतीयाबुधे । षष्ठीनेष्टफलप्रदा गुरुदिने शुक्रेद्वितीयातथा सर्वारम्भविनाशनस्यजननी सूर्यात्मजेसप्तमी ॥ ❋ अथ वारनक्षत्रयोगे मृत्युयोगः ❋ त्यजरविमनुराधंवैश्वदेवञ्चसोमेशतभिषमपिभौमे चन्द्रजं चाश्विनीषु । मृगशिरसिसुरेज्यं सर्पदेवञ्चशुक्रे रविसुतमपिहस्ते मृत्युयोगाभवन्ति ॥ ❋ अथ यात्रायां शुभाशुभ मध्यमर्क्षाणि ॥ ❋ अश्विनीरेवती ज्येष्ठापुष्योहस्तः पूनर्वसू । मैत्रं मृगशिरोमूलं यात्रायामुत्तमाः स्मृताः॥१॥ भरणी कृत्तिका श्लेषा विशाखाचोत्तरात्रयम् । मघापशुपतिश्चैव यात्रायांमरणप्रदाः ॥२॥

१ अनुगताराधाविशाखायस्मिंस्तस्मिन ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अन्यान्यृक्षाणि मध्यमानि ॥ ❀ अथयमघण्टः ॥ ❀
मघाश्वातीरवौप्रोक्ते गुरौमूलञ्च रेवती । स्वातीचरोहिणी
शुक्रे शतभिषा श्रवणेशनौ ॥१॥ अश्लेषाच तथासोमे
भरणीमैत्रभेकुजे । आर्द्रोत्तराफल्गुनीच यमघण्टोबुधैः
स्मृतः ॥२॥ यमघण्टे त्यजेदष्टौमृत्यौद्वादशनाडिकाः ।
अन्येषां पापयोगानां मध्याह्नात्परतः शुभम् ॥ ३ ॥
❀ अथ चन्द्रविचारः ॥ ❀ मेषादिक्रमतःपूर्वाद्याशा-
स्वास्तेहि चन्द्रमाः । शुक्लेच बलवान्कृष्णेताराबलवती
भवेत् ॥ ❀ अथ यात्राकाले चन्द्र फलम् ॥ ❀
संमुखेचार्थलाभःस्याद्दक्षिणेसुखसम्पदो । पृष्ठेचशोक-
सन्तापो वामे चन्द्रे धनक्षयः ॥ ❀ अथ दुष्टचन्द्रादि-
शान्तिः ❀ चन्द्रेच शंखं लवणं तथर्क्षे तिथौ तथा
तण्डुलमेव शुभ्रम् । धान्यञ्चदद्यात्किलऋक्षवारे देया-
स्तिलाएवमनिष्टलग्ने ॥ ❀ अथ दिननक्षत्रयोगे
ऽमृतयोगः ❀ आदित्यहस्ता सुरपूज्यपूषा बुधानु-
राधा शनिरोहिणीच । सोमेच सौम्यंकुजरेवतीच शु-
क्राश्विनीचामृतयोगमाहुः ॥ ❀ अथ शुभयोगः ❀
मूलंरवौ पुष्यकरोत्तराणिवेधोमृगांकश्रवणाश्चसोमे ।
कृशानुपुष्योत्तरभानिभौमे बुधेऽनुराधावरुणः कृशा-
नुः ॥१॥ बृहस्पतौ पुष्यपुनर्वसूच भगाश्विनीच श्रवणा
चशुक्रे । शनैश्चरे स्वाति पितामहोच योगाः किलैते

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शुभदायिनः स्युः ॥ २ ॥ ❋ अथाशुभयोगः । ❋ जन्मताराष्टमे चन्द्रे संक्रान्तौ सूर्यगे विधौ । भद्रागण्डान्त- रिक्तासु षष्ठ्यां नैव व्रजेत्क्वचित् ॥ १ ॥ द्वादश्यामपि चाष्टम्यां न गच्छेत्प्रस्थितोऽपि सन् । जन्ममासे न गन्तव्यं शत्रुविजयमिच्छता ॥ २ ॥ ❋ अथ यम- दंष्ट्रा ❋ विवर्जयेत्सूर्यमघाधनिष्ठा सोमे च मूलञ्च तथा विशाखा । भौमे भरण्यामपि कृत्तिका च बुधाश्विनी चोत्तर- फल्गुनी च ॥१॥ जीवे मृगश्चैव समर्यमा च सोमाङ्गना- स्वातितथाभृगौ च । हस्तश्च चित्रा भवेन्मन्दवारे यम- स्य दंष्ट्रा भरणी प्रशंसा ॥ ❋ अथ लग्नयोगाः ❋ एकोऽङ्गिज्यसितेषु पञ्चम तपः केन्द्रेषु योगस्तस्था द्वौ चे- त्तेष्वधियोग एषु सकला योगाधियोगस्ततः । योगे क्षेम- मथाधियोगगमने क्षेमं रिपूणां वधश्चाथो क्षेमयशोऽवनीं च लभते योगाधियोगे व्रजन् ॥ ❋ अथ यात्रास्थान- व्यवस्था ❋ देवगृहाद्वा गुरुसदनाद्वा पुत्रकलत्रसुहृत्- सदनाद्वा । प्राश्य हविष्यं विप्रानुमतः पश्यन् शृण्वन्मंगल- मीयात् ❋ अथ प्रस्थानस्तूनि ❋ कार्याद्यैरिह गमन- स्य चेद्विलम्बो भूदेवादिभिरुपवीतमायुधञ्च । क्षौद्रं वा- मलफलमाशु चालनीयं सर्वेषां भवति यदेव हृत्प्रियं वा ॥ ❋ अथ शकुनानि ❋ अग्रे धेनुः सवत्सा वृषगज- तुरगा दक्षिणावर्त्तवह्निर्दिव्यस्त्री पूर्णकुम्भो द्विजवरग-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

णिकाश्वेतमाला पताका ॥ मत्स्योमांसंघृतंवादधिमधुसहितं कांचनंशुक्लवस्त्रंदृष्ट्वास्पृष्ट्वापठित्वाफलमिहलभतेमानवोगन्तुकामः ॥ इति ॥ अत्रदर्शनंगवादेः, स्पर्शनं रत्नादेः, पाठश्च " मंगलंभगवान् विष्णुर्मंगलंगरुड़ध्वजः ॥ मण्डलंपुण्डरीकाक्षोमंगलायतनं हरिः ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः । येषामिन्दीवरश्यामोहृदयस्थोजनार्दनः ॥ वैन्यंपृथुंहैहयमर्जुनञ्चशाकुन्तलेयंभरतंनलञ्च । एतान्हियोवैस्मरतिप्रयाणेतस्यार्थसिद्धिः पुनरागमश्च" इत्यादेः ॥ अत्र शकुनान्तराणिग्रन्थांतरेषुद्रष्टव्यानि ❀ अथापशकुनेषु क्षुतम् ❀ सर्वारम्भेक्षुतंनेष्टंगोक्षुतंमरणप्रदम् । अफलंतत्क्षुतंज्ञेयंवृद्धपीनसकेरितम् ॥ १ ॥ औषधेवाहनारोहे विवादेशयने[२]ऽशने । विद्यारम्भेबीजवापेक्षुतंसप्तसुशोभनम् ॥२॥ आद्येऽपशकुनेस्थित्वाप्राणानेकादशव्रजेत् । द्वितीयेषोड़शप्राणाँस्तृतीयेनक्वचिद्व्रजेत् ॥३॥ ❀ अथ दिवाइष्टकालज्ञानम् ❀ छायापादेरसोपेतैरेकविंशतिकंभजेत् । लब्धदण्डपलांकेनइष्टकालोदिवाभवे-

---

१ मद्योमांसमितिक्वचित्पाठः । अत्रपाठेऽपिमांससाधस्कमेव, अन्यत्रापितथादर्शनात् ॥

२ शयनाऽऽसनेइतिपाठोऽपि । अत्रासनमुपवेशनन्तत्रापिक्षुतमिष्टमन्यत्रापितथोक्तेः ।

३ प्राणान् श्वासान् व्याप्य, तावच्छ्वासपर्यन्तमित्येवमर्थस्सर्वत्रकार्यः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त् ॥ ❋ अथवा ❋ रामांगुलिकृताछाया छायारामेण- संयुता । चतुष्षष्ठयाहरेद्भागंलब्धोलण्डस्थितंपलम् ।
❋ अथ रात्रौ लग्न ज्ञानम् ❋ पश्चिमादिनैर्ऋत्यन्तदिग्विदिक्षुसताकणे । तिष्ठतो क्रमतोद्वेभेद्वयोरेकत्रमेषतः॥
❋ अथ प्रकीर्णकाः ॥ ❋ रविशुद्धौ गृहकरणं रविगुरुशुद्धौ व्रतोद्वाहौ । क्षौरंतारकशुद्धौ शेषं चन्द्राश्रितं कर्म्म ॥१॥ सदासर्वेषुकार्येषु चित्तशुद्धिर्विशेषतः । सितेन्दुबुधजीवानांवाराः सर्वत्रशोभनाः ॥ भानुभूसुतमन्दानां शुभकर्मसुकेष्वपि ॥२॥ कुर्यान्मंगलपौष्टिकानि नृपते र्यात्राभिषेकौ तथा । सेवा भेषजवह्निकर्मकरणं चारोग्यकर्माणिच ॥ विद्यादानवरव्रतानि हवनंशिल्पंरणं साहसम् । शिक्षालङ्करणेदिने दिनपतेर्लग्नेस्थिते वा रवौ ॥ १ ॥ रक्तस्रावविषास्त्रकर्महुतभुक्कार्यं विवादंरणम् कुर्याद्द्वन्द्वविधिंसुदुष्टदमनंसेतुप्रभेदंतथा ॥ वृक्षच्छेदनभेदनानि मृगयाचौर्यं तथासाहसम् । सैनान्यं कृषिकर्मधातुकरणं भौमस्य लग्नेऽह्निवा ॥ २ ॥ स्थाप्यं समाप्यंक्रतुदानकार्यं गृहेप्रवेशो नगरे पुरेवा । भौमोक्तकार्यं गजवाजिबन्धोदिने प्रसिध्यन्तिशनैश्चरस्य ॥ ❋ इति वारफलम् ॥ ❋ अथ तिथीनांनाम भेदेन फलभेदकथनम् ❋ नन्दाचभद्राचजयाचरिक्ता पूर्णेतिथिश्चोऽशुभमध्यशस्ताः । सितेऽसिते शस्तसमा

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ऽधमाः स्युः सितज्ञभौमार्किगुरौचसिद्धाः ॥ शनिभौमगतारिक्ता सर्वसाज्यदायिनीतिचान्यत्र ॥ श्रीपतिसमुच्चये ॥ ताराचन्द्रबलेप्राप्ते दोषाश्चान्येभवन्तिये । तेसर्वेविलयंयान्ति सिंहंदृष्ट्वागजाइव ॥ ॥ अथाधोमुखनक्षत्राणि ॥ आश्लेषवह्नियमपित्र्यविशाखयुग्मं पूर्वात्रयं शतभिषाच नवाप्युडूनि । एतान्यधोमुखगणानिशिवानिनित्यंविद्यार्थभूमिखननेषुच भूषितानि ॥

॥ अथोर्ध्वमुखनक्षत्राणि ॥ उत्तरात्रितयंपुष्यो रोहिण्यार्द्राश्रुतित्रयम् । ऊर्ध्ववक्रोगणोज्ञेयो नक्षत्राणिमनीषिभिः ॥ १ ॥ प्रासादच्छत्रगेहानि प्राकारध्वजतोरणम् । राजाभिषेकमश्वंच कुर्यादूर्ध्वमुखेगणे ॥२॥

॥ अथ तिर्यङ्मुखनक्षत्राणि ॥ रेवतीयुगलंज्येष्ठामैत्रो हस्तत्रयोमृगः । पुनर्वसुश्चविज्ञेयो गणस्तिर्यङ्मुखो बुधैः ॥ १ ॥ वृक्षारोपणवाणिज्यं सर्वसिद्धिंचकारयेत् । वारुणानिचयन्त्राणिगमनन्तिर्यगानने ॥ २ ॥ वास्तुप्रदीपे ॥ अधोमुखैर्भैर्विदधीतखातंशिलान्यसेदूर्ध्वमुखेचऋक्षे । तिर्यङ्मुखैर्द्वारकपाटजातं गृहप्रवेशोमृदुभिर्ध्रुवैश्च ॥ १ ॥ अधोमुखैश्चनक्षत्रैःकर्त्तव्यंभूमिशोधनम् । मृदुध्रुवैःशुभंकुडयमित्युक्तंविश्वकर्मणा ॥२ पञ्चकेषुचधिष्ण्येषुस्तम्भमुत्थापयेन्नहि । क्षेत्रसूत्रशिलान्यासंप्राकारादिसमारभेत् ॥ ३ ॥ इति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

❋ अथ वारवेलामाह ❋ कृतमुनियमशरमंगल रामर्त्तुषुभास्करादियामार्द्धम् । प्रभवतिहिवारवेलानशुभा शुभकार्यकरणाय ॥ ❋ अथकालवेला ❋ कालस्यवेलारवितःशराक्षिकालानलागाम्बुधयोगजेन्दुः । दिनेनिशायामृतुवेदनेत्रनगेषुरामाविधदन्तिनौच ॥ ❋ अथ वार-कालकुलिकवेलामाह ❋ वेदानागेषुशैलामुनिनयनरसायुग्मषट्कामवाणाः वाणाशोनाक्षिवेदा वसुमुनिहरदृक्चाग्निवेदद्वयानि । षष्ठाष्ठैकंदिनेशात्क्रमशइहदिनेमन्त्रिचण्डेश्वरोक्तःपूर्वंवारार्धयामःकुलिकइहपरोमध्यमश्चेतिकालः ॥ १ ॥ विशेषतः कुलिकवेलाप्रयोजनन्तु "जपित्वासितगुञ्जायांगुडकंकुलिकोदये " इत्यनेननवदुर्गामन्त्राभिचारकर्मणिशारदायामुक्तम् ॥ तट्टीकाकारराघवभट्टस्तु 'मन्वर्कदिग्वसूत्तुवेदपक्षैरर्कान्मुहूर्त्तैः कुलिकाभवन्ति । दिवानिरेकैरथयामिनीषुतेगर्हिताःकर्मसुशोभनेषु" इत्याह । निरेकैः पूर्वोक्तमन्वादिमुहूर्त्तैरेकोनैरित्यर्थः ॥ अत्र यात्रायांमरणं काले वैधव्यं पाणिपीड़ने । व्रतेब्रह्मवधःप्रोक्तः सर्वकर्मत तस्त्यजेत ॥ ❋अथ ग्रहणदर्शनफलम् ❋ जन्मर्क्षेनिधनं ग्रहे जनिभतोघातःक्षतिःश्रीर्व्यथा चिंता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशः सुखम् ॥ लाभोपाय इति क्रमात्तदशुभध्वस्त्यै जपः स्वर्ण-गोदानं शांतिरथो ग्रहंत्वशुभदं नो वीक्ष्यमाहुः परे ॥ इति ॥ ❋ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्री आ
देलव
पुस्तक नं

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com